R
449

Sree Chamarajendra Sanskrit College

FORT, BANGALORE CITY.

LIBRARY RULES.

I. Any one who shall lose, deface by writing or otherwise injure any book, shall pay the full cost of the book, or entire work, if there be more than one volume.

II. No student shall have more than one volume out of the Library at a time.

III. Students must not pass books from one to another, but must return them to the Librarian.

IV. Library books must not be used as class books.

V. Books must not be retained longer than 3 days or *one week*. They may be borrowed again, if not wanted by others.

VI. Text-books and books of reference shall not be taken home.

Accession No. 742 Class M No. 18

Date of addition to Library..........................

Cost Rs.................As...........

SREE CHAMARAJENDRA SANSKRIT COLLEGE LIBRARY
FORT, BANGALORE.

SRI CHAMARAJENDRA SANSKRIT COLLEGE LIBRARY

BANGALORE

Accn. No. 640

1. The maximum time allowed for retention of a book shall be one fortnight. It may be borrowed again if not required by others.

2. No reference books shall be lent out.

3. No borrower shall have more than two volumes out of the Library at one time.

4. Borrowers must not pass books from one to another but must return them to the Librarian.

5. Library books must not be used as class-books.

6. Any one who defaces by writing or otherwise damages any book shall pay the full cost of the book or of the entire works, if it consists of more than one volume.

7. The borrower shall be responsible for the value of the books lent out to him if they are lost, damaged or otherwise cannot be returned to the Library when they are due or recalled.

8. The presence of the voucher with the Librarian shall be considered sufficient proof of the non-return of books.

Class and No. ~~M·14~~ G 35

1615-36 The Bangalore Press

G 35
XXIII 13
649

SASTHRAMUKTHAVALI -10.

GITARTHA SANGRHA.

BY

SRI YAMUNA CHARYA.

With

GITARTHA SANGRAHA RAKSHA

A Comentāry

OF

SRI MATH VADANTA DESIKA.

EDITED BY

P. B. ANANTHA CHARIAR

Sanskrit Pandit

Printed At The

SRI SUDARSANA PRESS.

CONJEEVERAM.

1901.

Price. As-6

शास्त्रमुक्तावळी – १०

गीतार्थ संग्रहः

श्रीभगव द्यामुन मुनिवर विरचितः ।

श्री कवितार्किक सिंहेन सर्वतन्त्र स्वतन्त्रेण
श्रीम द्वेदान्ताचार्येण विरचितया

गीतार्थ संग्रह रक्षाख्यया व्याख्यया सह।

श्रीकाञ्ची

प्रतिवादिभयङ्करं अनन्ताचार्येण

श्री सुदर्शन मुद्राक्षर शालायां

अमुद्र्यत ।

॥ श्रीकांची ॥

इदानी मेतन्मूल्यम्- ० – ६ – ०

श्री ।:

गीतार्थसंग्रहरक्षा भूमिका।

गीतार्थसंग्रहः ।

इयंकिल कृतिः भगवद्यामुनमुनीशितुः श्रीभाष्यकार प्राचार्यस्य। अयंहि गुरूत्तमो ऽवततार कलौ ४०१८ (A.D.906.) धातृ वत्सरे कर्कटमासीयोत्तराषाढायां वीरनारायणपुरे चिदम्बरक्षेत्रसमीपस्थे । पिता महोऽस्य भगवान् नाथमुनिमिश्रः योगमहिमप्रत्यक्षतत्वत्रयः न्यायतत्वयोगरहस्ययो र्निबद्धा योगबलाध्यक्षिताव शठकोपमुनेः न्यासविद्यासम्प्रदायं द्रमिडाम्नायसंहितां अन्यांश्च सर्वान् सांप्रदायिका नर्थविशेषान् लेभे । सोयम् श्रीशठमर्षणमहर्षे र्वंश्यो भगवन्नाथमुनिमिश्रप्रशिष्यैः श्रीराममिश्रगुरुभिः कृपया परया गुरुकुलकिंचित्कारप्रवणै स्स्वयं बहुशोऽळर्क पत्रोपहारार्पणे नोपगच्छद्भि श्चिरादप्यनुपजात आभिमुख्ये कदाचि त्तदर्पणं परिहरद्भि रथच कुतो नाद्याळर्कपत्रापाक इत्यनुयुक्तेन पाचकेन महात्मा कोपि प्रतिदिन मर्पय न्नाद्यार्पिपदिति सूचितैः स्वोपसेवनबद्धतृरणेन परेद्यवि सगौरवं प्रतिपालयता गुरुणानेन प्रत्युद्गतैः 'दर्शनादेव साधव' इति वचनबला त्कटाक्षमात्रदूरीकृत राजभावप्रयुक्तान्यपर्यादिदोषकथः क्रमा दुपदिष्टशास्त्रार्थसार स्सन्नयास्थत ।

बाल्येच महाभाष्यभट्टारका दधीयानो विद्या मपुनरुच्चारणेना न्यामेव नवीना मक्षरमातृकां निर्माय बालका नद्ध्यापयत । चोळराजसदसि विद्वज्जनकोलाहलनामानं पण्डितवर्य मजयत । अस्य जयापराजययोः पणबन्धमारचितवतो राजदंपत्योः श्रीरगांबया राजमहिष्या (आळवन्दार्) 'रक्षणायागत' इत्यभिनन्दित स्तत्पणबन्धानुसारेण राज्ञार्पितं राज्यार्धं न्याय्येन पथा पर्यपालयत ।

तस्यास्य गुरूत्तमस्य कृतयः - आगमप्रामाण्यं , महापुरुषनिणर्यः, आत्मासीद्धिः, संवित्सिद्धिः, ईश्वरसिद्धिः , श्रीगीतार्थसंग्रहः, श्रीस्तुतिश्चतुश्लोकी , स्तोत्ररत्नं , इत्यष्टौ ।

अन्यतमोऽयमेषु श्रीगीतार्थसंग्रहो भगवद्भाष्यकारविरचित गीताभाष्यानुसारेण व्याख्यायि श्रीमता कवितार्किकसिंहेन श्रीरंगराजदिव्याज्ञा लब्धवेदान्ताचार्यपदेन तत्सहधर्मचारिणी करुणाकटाक्षलम्भित सर्वतन्त्रस्वतन्त्रबिरुदेन श्रीवेंकटनाथदिव्यघण्टांशेन श्रीवेंकटनाथदेशिकेन ।

सोयं गुरुरवततार कांच्यां कलौ (४३७०) तमे A(1268) विभववत्सरे कन्याश्रोणायां विश्वामित्राकुलतिलकस्या नन्तार्य गुरो स्सोमयाजिनो जायायां तोताद्रयंबासमाख्यायाम् ।

अयंच मातुलेन वादिहंसांबुवाहार्येणा ध्यापितसकलशास्त्रः विंशत्यब्दे विश्रुतनानाविधविद्यः त्रिंशद्वारं श्रावितशारीरकभाष्यः श्रुतप्रकाशिकाशताभिषेककारी तात्पर्यचन्द्रिकया विशदीकृतगीताभाष्यसारार्थः पारिप्लवमतिभिरन्यथोपवर्णयद्भि रर्थजात मुपजातां वैयाकुली मपाकर्तुं संक्षेपात गीताभाष्यपङ्क्तिभिरेव स्वय मेनं व्याचख्यौ श्रीगीतार्थसंग्रहम् । सेयं व्याख्यान्वर्थनाम्नी श्रीगीतार्थसंग्रहरक्षा । अस्य कृतयः परश्शताः । तासुचाद्य यात्र दस्माभि र्मुद्रिता मुद्र्यमाणाश्च , मीमांसापादुका - शतदूषणी - सेश्वर मीमांसा च ।

व्याख्यानरत्नेन चानेन सह सर्वसम्मान्यस्य गीतार्थसंग्रहस्य मुद्रणं सर्वदेशप्रसृमरया सर्वादिभूतया नागरलिप्या वश्यकर्तव्य मद्ध्यवस्यद्भि रस्माभि रिय मद्य शास्त्रमुक्तावळ्या ममुद्र्यतेति भावयन्तु सहृदयाः ।

इति

श्री सुदर्शन पादपद्मसेवी

शास्त्रमुक्तावळीसम्पादकानुमतः ।

श्रीः ।

श्रियैनमः ।

श्री हयग्रीवाय नमः ।

॥ शास्त्रमुक्तावळी ॥

श्रीमद्यामुनमुनिवर विरचितः

श्रीम द्गीतार्थ संग्रहः ।

यत्पदाम्भोरुह ध्यान विध्वस्ताशेषकल्मषः ।
वस्तुता मुपयातोऽहं यामुनेयं नमामि तम् ॥
विगाहे यामुनं तीर्थं साधु बृन्दावने स्थितम् ।
निरस्तजिह्मगस्पर्शे यत्र कृष्णः कृतादरः ॥

श्रीम द्वेदान्तदेशिक विरचिता गीतार्थसंग्रहरक्षा ।

श्रीमान् वेंकटनाथार्यः कवितार्किक केसरी ।
वेदान्ताचार्य वर्योमे सन्निधत्तां सदाहृदि ॥

* मानत्वं भगवन्मतस्य महतः पुंस स्तथानिर्णय-
स्तिस्रस्सिद्धय आत्मसंवि दखिलाधीशान तत्त्वाश्रयाः ।
गीतार्थस्य च संग्रह स्स्तुतियुगं श्रीश्रीशयोरित्यमू-
न्यद्ग्रन्था ननुसन्दधे यतिपति स्तं यामुनेयं नुमः ॥ १ ॥
श्रीमद्वेंकटनाथेन यथाभाष्यं विधीयते ।
भगवद्यामुनेयोक्त गीतासंग्रहरक्षणम् ॥ २ ॥

* श्री पांचरात्र प्रामाण्यस्थापक आगम प्रामाण्य नामा ग्रन्थः ।

" तत्वंजिज्ञासमानानां हेतुभिस्सर्वतोमुखैः ।
तत्वमेकोमहायोगी हरिर्नारायणः परः ॥ "

" आलोड्य सर्वशास्त्राणि विचार्यच पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयोनारायणस्सदा ॥ "

इत्यादिभि स्तत्वहित रूपं समस्ताध्यात्म शास्त्रार्थसारं महर्षय स्संजगृहुः, तदेतदुभयं सर्वोपनिष त्सारसंकलनात्मिकायां भगवत् गीतायां प्रतिपाद्यतया-प्रदर्शयन् तत्राप्युपनिषदां तत्वप्राधान्यस्य शारीरकसूत्रितत्वा दिहापि त त्प्रधानतया व्यपदिशति ।

स्वधर्मज्ञानवैराग्य साध्यभक्त्येकगोचरः ।
नारायणः परंब्रह्म गीताशास्त्रे समीरितः ॥ १ ॥

स्वे धर्माः- स्वधर्माः, स्ववर्णाश्रम नियत शास्त्रार्थाः । 'स्वेस्वेकर्मण्यभिरत स्संसिद्धिं लभते नर' इतिहि गीयते । स्वस्य धर्म इतिसमासे प्ययमेवार्थः । ज्ञान मत्र परशेषतैकरस यथावस्थितात्म विषयं । वैराग्यम्-परमात्मव्यतिरिक्तेषु सर्वेषु विरक्तिः,'परमात्मनियोरक्तो विरक्तोऽपरमात्म नी' तिमुमुक्षोः स्वभावप्रतिपादनात् । तथा च पातंजलयोगानुशासन सूत्रम् ' दृष्टानुश्रविक विषय वितृष्णस्य वशीकारसंज्ञा वैराग्य ' मिति । कर्मयोगपरिकरभूतस्यापि वैराग्यस्य पृथगुपादान मपवर्गस्य तदन्वयव्यतिरेका नुविधायित्वेन तत्प्राधान्य ज्ञापनार्थं, कन्दभूत रागनिवृत्या तन्मूल क्रोधादिसमस्तदोषनिवृत्ति ज्ञापनार्थंच । तत्र स्वधर्मज्ञानयोः प्रथमं कर्मयोगज्ञानयोगरूपेणा वस्थितयो रात्मसाक्षात्कारद्वारा भक्तियोगाधिकार-निर्वर्तकत्वेन तत्साधकत्वं । तदभिप्रायेणोक्त मात्मसिद्धौ 'उभयपरिकर्मित स्वान्त स्यैकांतिकात्यंतिक भक्तियोगलभ्य ' इति । उत्पन्नभक्तियोगानामपि विशदतम-प्रत्यक्षसमानाकारस्य तैलधारावत् दविच्छिन्न स्मृतिसन्तति रूपस्य आप्रयाणा

दनुवर्तनीयस्य अहरहरभ्यासाधेयातिशयस्य भक्तियोगस्य सत्वविशुद्धिसाध्यतया तद्विरोधि रजस्तमोमूलभूत पापनिबर्हणद्वारेण सत्वोपचयहेतुतयो पकारकत्वादात्मयाथात्म्यज्ञानपूर्वकैः परित्यक्तफलसङ्गकर्तृत्वादिभिः परमपुरुषाराधनैकवेषै र्नित्यनैमित्तिक कर्मभि र्भक्ते रुपचीयमानत्ववेषेण साध्यत्वं । तदेतत्सर्वमभिसन्धायोक्तं भगवता पराशरेण 'इयाजसोपि सुबहू न्यज्ञान् ज्ञानव्यपाश्रयः । ब्रह्मविद्यामधिष्ठाय तर्तुंमृत्युमविद्यये' ति । महनीयविषये प्रीति र्भक्तिः। 'स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधीयत' इति वचनमपि पूज्यविषयविशेषनियतं योज्यं। सैव वेदनोपासनध्यानादिशब्दै रध्यात्मशास्त्रेषु मोक्षोपाय विधिवाक्यै स्सामान्यतो विशेषतश्च प्रतिपाद्यते । गुरुलघु विकल्पानुपपत्ते स्सामान्यशब्दानां समान प्रकरणोक्त विशेष विश्रमेच सम्भवति द्वारिद्वारादिकल्पनायोगात् विद्युपास्योर्व्यतिकरेणोपक्रमोपसंहार दर्शना न्निदिध्यासितव्य इत्यस्य स्थाने विज्ञान शब्द श्रवणाच्च। तथा परमपुरुष वरणीयता हेतुभूत गुणविशेषवतैव लभ्यत्वश्रुतेः, तद्वरणस्यास्मिन् शास्त्रे भक्त्यधीनत्वोक्तेश्च । एवं सति वेदनेतरमोक्षोपाय निषेधकश्रुतीनां, ' भक्त्यात्वनन्यया शक्य - अहमेवं विधोर्जुन । ज्ञातुंद्रष्टुंच तत्वेन प्रवेष्टुंच परं तपे' त्यादि स्मृतिनांचाविरोधः, तदेतदुक्तं 'भक्त्येकगोचर' इति । भक्तेरेव गोचरो नान्यस्येत्यर्थः । एतेन कर्मसमुच्चय वाक्यार्थज्ञानादिपक्षाः प्रतिक्षिप्ताः । गोचरत्वमिह फलत्वेन ग्राह्यम् । 'भक्त्येकलभ्ये पुरुषेपुराण' इत्यादिभि रैकरस्यात् 'भक्तियोगलभ्य' इति स्वोक्तसंवादाच्च। उपायतया फलतया चैकस्यैवावलम्बना दैश्वर्याद्यर्थ भक्तिव्यवच्छेदार्थवाऽत्रैकशब्दः । अत्रह्यैश्वर्याद्यर्वाचीन पुरुषार्थग्रहणं भूमविद्यायामिव निरतिशय पुरुषार्थ प्रतिपादनार्थं। तदभि प्रायेण च भाष्यम् " परमपुरुषार्थ लक्षण मोक्षसाधनतया वेदान्तोदितं स्वविषयं ज्ञानकमानुगृहीतं भक्तियोग मव तारयामासे" ति। यद्वा - निरतिशयैश्वर्ययुक्ततया भक्त्यर्हत्वमिह तद्गोचरत्वं, ऐकांतिकत्वादि व्यंजनायत्वेक शब्दः। 'परावरञ्च भूताना' मित्याद्युक्त परावरतत्वनिश्चयेन अन्यभक्त्युन्मूलना दव्यभिचारेण

अन्याविषयत्व मैकान्तिकत्वं । सातिशयनिरतिशयपुरुषार्थविवेकेन तदेकभोग्यतया उत्तरावधि राहित्य मात्यन्तिकत्वम् । कारणवाक्यस्थानां सद्ब्रह्मादि सामान्य शब्दानां समानप्रकारण महोपनिषदादिपठिता बाधिता सम्भवद्वत्यन्तर नारायणादि विशेषशब्दार्थ विश्रमं व्यञ्जयितुं " नारायणः परंब्रह्म " ति विशेषत स्सामान्यतश्च व्यपदेशद्वयं । अनेन अविभक्तिकेपि नारायणानुवाकवाक्ये पूर्वापर वाक्यच्छायानुसारा च्छाखांतर सविसर्जनीयपठनाच्च व्यस्तत्वं व्यञ्जितम् । तेन च सर्वपरविद्योपास्य विशेषनिर्धारणार्थतया केवलपरतत्व प्रतिपादनपर नारायणानुवाक सिद्धएवास्य शास्त्रस्यविषयः, तद्विभूतित्वेन " विश्वमेवेदंपुरुष" इतिवत्समानाधिकरणतया तत्राम्नातानां ब्रह्मशिवेन्द्रादीनां नारशब्दार्थानामिहापि "ब्रह्माण मीशान" मित्यादिभि स्तद्विभूत्यैकदेशाश्रयत्वं प्रतिपाद्यत इतिख्यापितम् । उक्तंच स्तोत्रे "स्वाभाविकानवधिकातिशयेशितृत्वं नारायणत्वयिनमृष्यति वैदिकः कः । ब्रह्माशिव श्शतमखः परमस्स्वराडि त्येतेपि यस्य महिमार्णव विप्रुषस्ते " इति । संवित्सिद्धौच अद्वितीयश्रुतिव्याख्याने दर्शितम् - " यथा चोळनृप स्सम्राडद्वितीयो ऽस्ति भूतले । इति तत्तुल्यनृपतिनिवारणपरं वचः ॥ न तु तत्पुत्रतद्भृत्यकळत्रादिनिवारणम् । तथा सुरासुरनर ब्रह्माण्डशतकोटयः ॥ क्लेशकर्मविपाकाद्यै रस्पृष्टस्याखिलेशितुः । ज्ञानादिषाड्गुण्यनिधे रचिन्त्यविभवस्य ताः ॥ विष्णो र्विभूतिमहिम समुद्रद्रप्स विप्रुष " इति । पुरुषनिर्णयेच एतत प्रपंचो ग्राह्यः । तदेतद्व्यपदेशद्वयं " श्रियःपति " रित्यादिना प्रारम्भभाष्येण व्याकृतम् । अतएवहि तत्रापि " परंब्रह्म पुरुषोत्तमो नारायण " इत्यन्तेन समभिव्याहृतम् । प्रपंचित मेत दस्माभि स्तात्पर्यचन्द्रिकाया मिति नात्र विस्तृणीमहे । निर्विशेषणस्यैव ब्रह्मशब्दस्य काष्ठाप्राप्त बृहत्वबृंहणत्वयोगिनि परमात्मन्येव योगरूढत्वेपि तस्मादन्यत्र जीवादौ तद्गुणलेशयोगा दौपचारिक प्रयोगरूढे स्तद्व्यवच्छेदाय परमिति विशेषितम् । एवमेव ह्यन्यत्रापि विशेष्यते । व्योमातीतवादिमत निरसार्थं वा परत्वोक्तिः । गीतेव

तत्वहितयो र्यथावच्छासनात् गीताशास्त्रं । उपनिष त्समाधिना सद्व्यवहार नि रूढे स्त्रीलिंगनिर्देशः । एतेन शास्त्रान्तरा दस्य शास्त्रस्याधिक्यं व्यंजितम्। स्वयंच महाभारते महर्षिणोक्तम् " अत्रोपनिषदं पुण्यां कृष्णद्वैपायनोऽब्रवी " दिति । उक्तंचाभियुक्तैः " यस्मिन् प्रसादसुमुखे कवयोपि तेते शास्त्राण्य शासुरिह तन्महिमाश्रयाणि । कृष्णेन तेन यदिह स्वयमेव गीतं शास्त्रस्य तस्य सदृशं किमिवास्ति शास्त्र " मिति । पंचम बेदेचास्यांशस्य प्राधान्यमुद्र त्याहुः " भारते भगवद्गीता धर्मशास्त्रेषु मानवम् । वेदेषु पौरुषं सूक्तं पुरा णेषुच वैष्णव " मिति । सर्मारित स्सम्यगीरितः । अज्ञानसंशय विपर्यय प्रतिक्षेपेण परमप्राप्यत्व प्रापकत्व सर्वकारणत्व सर्वरक्षकत्व सर्वसंहर्तृत्व स- र्वाधिकत्व सर्वाधारत्व सर्वनियंतृत्व सर्वशेषित्व सर्ववेदवेद्यत्व सर्वहेयरहितत्व सर्वपापमोचकत्व सर्व समाश्रयणीयत्वादिभिः स्वभावै स्समस्त दस्त्वन्तर वि लक्षणतया पुरुषोत्तमत्वेन प्रतिपाद्यत इत्यर्थः । समन्वय सूत्रव न्निरतिशय पुरुषार्थविवक्षया वा स मित्युपसर्गः । एव मनेन श्लोकेन शास्त्रार्थ स्संगृहीतः ॥

अथ त्रिभिः श्लोकै स्त्रयाणां षट्काणा मर्थं संगृह्णाति ।

ज्ञानकर्मात्मिकेनिष्ठे योगलक्ष्ये सुसंस्कृते ।
आत्मानुभूतिसिद्ध्यर्थे पूर्वषट्केनचोदिते ॥ २ ॥

ज्ञानात्मिकानिष्ठा-ज्ञानयोगः, कर्मात्मिकानिष्ठा-कर्मयोगः, नितिष्ठ त्यस्मिन्नर्थे अधिकर्तव्येऽधिकारीति निष्ठा। नियत स्थिति र्वा निष्ठा। यावत्फलं स्थिरपरिगृहीत मुपायानुष्ठानमित्यर्थः । अनयो स्स्वरूपं व्यंजयिष्यति"कर्मयोगस्तपस्तीर्थे"त्यादिना। योगलक्ष्ये- योगः,साध्यतया, लक्ष्य मुद्देश्यं ययो स्ते योगलक्ष्ये । अत्रकर्मनिष्ठया ज्ञान निष्ठामारुह्य तया योगप्राप्तिरिति*द्वैतीयः-क्रमः।*तार्तीयस्तु ज्ञाननिष्ठाव्यवधानमंतरेण

---

*द्वैतीयः - द्वितीयाध्यायोक्तः । *तार्तीयः - तृतीयाध्यायोक्तः ।

कर्मनिष्ठयैव यावद्योगारम्भं दृढ परिगृहीतया अन्तर्गतात्मज्ञानया शिष्टतया व्यपदेश्यानां लोकानुविधेयानुष्ठानाना मितरेषामपि निष्प्रमाद सुकरोपायसक्तानां योगावाप्तिरिति । योगोऽत्रा सनादिविशेषपरिकरवान् साक्षात्कारार्थआत्मावलोकनापरनामा चित्त समाधानविशेषरूपो व्यापारः । तत्साध्यसाक्षात्कार एववा । तेन स्मृतिसन्तति विशेषरूपा त्स्वकारणभूतज्ञानयोगा त्स्वकार्यभूता दात्मानुभवाच्च भेदः । ससंस्कृते-परमात्माधीनत्व तत्प्रीत्यर्थत्व फलान्तरसंगराहित्यादि बुद्धिविशेषैः परिकर्मिते इत्यर्थः । आत्मानुभूतिसिध्यर्थे- "सुखमात्यन्तिकंयत्त" दित्याद्युक्त प्रकारेण वैषयिकानन्द विलक्षण स्वेतरसमस्तवैतृष्ण्यावह सुखस्वभाव प्रत्यगात्म साक्षात्कारविशे-षरूप सिद्धिविशेषप्रयोजने इत्यर्थः । पूर्वषट्केन । चोदिते - कर्तव्यतयाऽनु शिष्टे इतियावत । तादर्थ्या दुपोद्घात रूपस्य प्रथमाध्यायस्य 'नत्वेवाह' मित्यतः पूर्वस्य द्वितीयाध्यायैकदेशस्यच तदनुप्रवेशवाचो युक्तिः । अहुश्चोपोद्घातलक्षणम् "चिन्तां प्रकृतासिध्यर्था मुपोद्घातं प्रचक्षत" इति ।

एव मनेन श्लोकेन प्रथमषट्कस्या वरतत्वविषय व्यवहितोपाय परत्व मुक्तम् ॥ २ ॥

अथमध्यमषट्कस्य परतत्वविषया व्यवहितोपाय परत्वमाह ।

मध्यमेभगवत्तत्व याथात्म्यावाप्तिसिद्धये ।
ज्ञानकर्माभिनिर्वर्त्यो भक्तियोगः प्रकीर्तितः ॥३ ॥

पूर्वश्लोके समासस्थस्यापि षट्कशब्दस्या त्र बुध्यानिष्कृष्य विपरिणतस्यानुषंगः । भगवच्छब्दो मध्यमषट्कोक्त सकलजगदेककारणत्व निर्दोषत्व कल्याणगु-णाकरत्व योगिनि परस्मिन् ब्रह्मणि प्रत्यक्षरं प्रकृतिप्रत्यय रूढिभिश्च भगवत्पराश रादिभि निरुक्तो द्रष्टव्यः । यस्यैषसंग्रहः "तत्रपूज्यपदार्थोक्ति परिभाषासमन्वितः ।

शब्दोय न्नोपचारेण ह्यन्यत्रह्युपचारतः " इति । अयंच ब्रह्मशब्दस्य परस्मिन्नेव मुख्यत्वे निदर्शनतया शारीरकभाष्यारम्भे दर्शितः ' भगवच्छब्दव ' दिति । भक्तेषु भागवतसमाख्याच भजनीये भगवच्छब्दस्य नामधेयतां व्यनक्ति । भगवानेव तत्वं भगवत्तत्वं । तत्वमिह प्रामाणिकः पदार्थः । तत्वेन प्रवेष्टु मित्यस्य अर्थंव्यनक्ति (याथात्म्यावाप्तिसिद्धयइति) ऐश्वर्यादि पुरुषार्थांतरोक्ते रात्मानन्यार्थत्व मनेन सूचितं । याथात्म्य मत्र अनवच्छेदेन पुष्कलमनारोपितं रूपं । अवाप्ति रनवच्छिन्नानंदतया ऽनुभूतिः, सैवसिद्धिः , पुरुषार्थकाष्ठारूपत्वात् । तस्यावा सिद्धिः लब्धिः । ज्ञानकर्माभिनिर्वर्त्ये इत्यनेन प्रथममध्यम षट्कयोः क्रमनियामक स्सङ्गतिविशेष स्सूचितः । तदनुसारेण सप्तमारम्भे भाष्यम् ' प्रथमेनाध्यायषट्केन परमप्राप्यभूतस्य परस्य ब्रह्मणो निरवद्यस्य निखिलजगदेककारणस्य सर्वज्ञस्य सर्वभूतात्मभूतस्य सत्यसंकल्पस्य महाविभूतेः श्रीमन्नारायणस्य प्राप्त्युपायभूतं तदुपासनं वक्तुं तदंगभूत मात्मज्ञान पूर्वक कर्मानुष्ठानसाध्यं प्राप्तुः प्रत्यागात्मनो याथात्म्यदर्शनमुक्तं, इदानीं मध्यमेन षट्केन परब्रह्मभूत परमपुरुषस्वरूपं तदुपासनं च भक्तिशब्दवाच्यमुच्यते, तदेतदुत्तरत्र ' यतः प्रवृत्तिर्भूतानां ' मित्यारभ्य ....'मद्भक्तिंलभतेपरा'....मितिसंक्षिप्य वक्ष्यत "इति । भक्तिरेवयोगः । 'योगस्सन्नहनोपायध्यानसंगति युक्ति' ष्विति पाठा द्योगशब्दोत्र उपायपरः । ध्यानपरत्वेपि सामान्यविशेष रूपतया ऽन्वयसिद्धिः । प्रकीर्तितः - स्वरूपत इतिकर्तव्यतातो विषयतः कार्यतश्च प्रकृष्टतया कीर्तितइत्यर्थः ॥ ३ ॥

एवं षट्कद्वयोक्त नानाविध तत्वहितविशोधनपरं क्रमा दन्तिम षट्कत्रिकद्वय मित्यभिप्रायेणाह ।

प्रधानपुरुषव्यक्त सर्वेश्वरविवेचनम् ।

कर्मधीर्भक्तिरित्यादिः पूर्वशेषोऽन्तिमोदितः ॥ ४ ॥

प्रधानं—कारणावस्थ मचित् द्रव्यं, पुरुषः- अचिन्मिश्रावस्थो विशुद्धावस्थश्च, व्यक्तन्तु महदादिविशेषान्तं तदारब्ध देवतिर्यङ्मनुष्यादिरूपं च कार्यजातं, सर्वेश्वरः - ' यो लोकत्रय माविश्य बिभ र्त्यव्यय ईश्वर' इत्युक्तः पुरुषोत्तमः, एतेना र्वाचीन परिच्छिन्ने श्वरव्यवच्छेदः, समाख्या चैषा सार्था भगवतः ' अज स्सर्वेश्वर स्सिद्ध ' इति तन्नामपाठात् , एतेषां, विवेचनं - परस्परव्यावर्तको धर्मः । तेनवा पृथक्त्वेनवा नुसन्धानं । कर्म धी भक्तिरिति कर्मयोगादीनां स्वरूपग्रहणं, इति - निर्दिष्टपदार्थवर्गः, आदि र्यस्य सः - इत्यादिः, आदिशब्देन तदुपादानप्रकारः तदुपयुक्तशास्त्रवश्यत्वादिकंच गृह्यते । पूर्वशेष इत्यनेन प्रकृतशोधनरूपतया पुनरुक्तिपरिहारः, संगतिप्रदर्शनंच । अयं श्लोकः त्रयोदशारंभभाष्येण स्पष्टम् व्याख्यातः " पूर्वस्मिन् षट्के परमप्राप्यस्य परस्य ब्रह्मणो भगवतो वासुदेवस्य प्राप्त्युपायभूत भक्तिरूप भगवदुपासनांगभूतं प्राप्तुः प्रत्यगात्मनो याथात्म्यदर्शनं ज्ञानयोग कर्मयोग लक्षण निष्ठाद्वयसाध्य मुक्तम् , मध्यमेच परमप्राप्यभूत भगवत्तत्व याथात्म्य तन्माहात्म्यज्ञान पूर्वकै कान्तिकात्यन्तिकभक्तियोगनिष्ठा प्रतिपादिता , अतिशयितैश्वर्यापेक्षाणां आत्मकैवल्य मात्रापेक्षाणांच भक्तियोग स्तदपेक्षित साधन मिति चोक्तम , इदानी मुपरितनेतु षट्के प्रकृतिपुरुष तत्संसर्गरूप प्रपंचे श्वर तद्याथात्म्य कर्मज्ञान भक्तिस्वरूप तदुपादानप्रकाराश्च षट्कद्वयोदिता विशोध्यन्त " इति । अत्र त्रिकभेदविवक्षाच षोडशारंभे दर्शिता " अतीतेना ध्यायत्रयेण प्रकृतिपुरुषयो र्विभक्तयो स्संसृष्टयोश्च याथात्म्यं तत्संसर्गवियोगयोश्च गुणसंग तद्विपर्यय

हेतुकत्वं सर्वप्रकारेणा वस्थितयोः प्रकृतिपुरुषयो र्भगवद्विभूतित्वं विभूतिमतो भगवतो विभूतिभूता दचिद्वस्तुन श्चिद्वस्तुनश्च बद्धमुक्तोभयरूपा दव्ययत्व व्यापन भरण साम्यै रर्थान्तरतया पुरुषोत्तमत्वेन याथात्म्यंच वर्णित" मिति। तदत्र तृतीयषट्के तत्वविशोधनपरं प्रथमत्रिकं, अनुष्ठान विशोधनपरं द्वितीय मिति प्रायिकतया ऽयं विभागो ग्राह्यः ॥

एवं शास्त्रार्थ ष्षट्कत्रयार्थश्च चतुर्भि श्श्लोकै स्संगृहीतः ॥ ४ ॥

इतःपरं अष्टादशभिः श्लोकैः प्रत्यध्याय मर्थाः संगृह्यन्ते ।

तत्र शोकतदपनोदनरूप कथावान्तरसंगत्या महर्षिणा प्रथमद्वितीयाध्याय विभागे कृतेऽपि शास्त्र तदुपोद्घातरूपार्थ विभागज्ञापनाय द्वितीयैकदेश मपि प्रथम श्लोकेन संगृह्णाति । तद्वयञ्जनायच " तमुवाचहृषीकेश " इत्यस्मात्पूर्वं अर्थव्याख्यान पूर्वक मयं श्लोको भाष्यकारै रुदाहृतः-"एव मस्थाने समुपस्थित स्नेह कारुण्याभ्या मप्रकृतिंगतं क्षत्रियाणां युद्धं परमधर्मम प्यधर्मं मन्वानं धर्मबुभुत्सयाच शरणागतं पार्थमुद्दिश्य आत्मयाथात्म्यज्ञानेन युद्धस्य फलाभिसन्धिरहितस्या त्मप्राप्त्युपायताज्ञानेनविना ऽस्य मोहो न शाम्यतीति मत्वा भगवता परमपुरुषेण अध्यात्मशास्त्रावतरणं कृतं, तदुक्तं ' अस्थान स्नेहकारुण्य धर्माधर्मधियाकुलं । पार्थं प्रपन्नमुद्दिश्य शास्त्रावतरणं कृत ' मिति " इति ।

अस्थानस्नेहकारुण्य धर्माधर्मधियाकुलं।
पार्थंप्रपन्नमुद्दिश्य शास्त्रावतरणं कृतम ॥ ५ ॥

अस्थान स्नेहकारुण्याभ्यां जाता, धर्मे ऽधर्मधीः - अस्थान स्नेह कारुण्य धर्माधर्मधीरि त्यत्र भाष्याभिप्रायः । " बंधुस्नेहेन परयाच कृपया धर्मभयेन च अतिमात्र सन्न सर्वांग " इति प्रथमाध्यायांत भाष्यानुसारेण धर्माधर्मभयाकुल मिति

पाठे त्रयाणां द्वंद्वः । धर्माधर्मभयं–रज्जुसर्पभयमितिवत् । उद्दिश्य - व्याजीकृत्ये त्यर्थः । तदेतत्सूचित मारम्भे " पांडुतनय युद्ध प्रोत्साहन व्याजेने " ति । प्रपन्नत्वा त्तमुद्दिश्येति विवक्षितम् । तदपिसूचितं " अस्य मोहो न शाम्यतीति मत्वे" ति । तदत्र "तमुवाचे" त्यादि श्लोकत्रयपर्यन्तो ग्रन्थः शास्त्रावताररूपः । तावत्संग्रहणा- यात्र श्लोके प्रथमाध्याय इत्यनुक्तिः । अस्ति ह्युत्तरेषु सप्तदशसु तत्तदध्यायग्र- हणं । अनन्तरेच संग्रहश्लोके " नत्वेवाहं जातुनासं " इत्यादे रर्थ मभिप्रेत्य- द्वितीयग्रहणं । सच द्वितीयांते व्याख्यान पूर्व मुद्धृतः " एवमात्मयाथात्म्यं युद्धाख्य- स्यच कर्मण स्तत्प्राप्तिसाधनता मजानत श्शरीरात्मज्ञानेन मोहितस्य ते- नच मोहेन युद्धा न्निवृत्तस्यास्य मोहशांतये नित्यात्मविषया सांख्यबुद्धि स्तत्पू र्विकाच असंगकर्मानुष्ठान रूप कर्मयोगविषया बुद्धिः स्थितप्रज्ञता योगसाधनभू- ता द्वितीयाध्याये प्रोक्ता, तदुक्तम् , 'नित्यात्मासंग........शान्तय' इति" इति ।

नित्यात्मासंग कर्मेहा गोचरासांख्ययोगधीः ।
द्वितीयेस्थितधीलक्ष्या प्रोक्तातन्मोह शांतये ॥ ६ ॥

संख्यया - बुद्ध्या, अवधारणीय मात्मतत्वं सांख्यम् , तद्विषया बुद्धि स्सांख्यधीः, नित्यात्मगोचरेति तद्विवरणं - एव मत्र असंगकर्मेहाशब्देनापि योगशब्दार्थविवरणा दपौनरुक्तयम् , स्थितधीः - स्थितप्रज्ञता, ज्ञाननिष्ठेत्यर्थः । सा, साध्यत्वेन, लक्ष्यं यस्यास्सा तथोक्ता । तन्मोहशान्तये - उक्तप्रकारस्य अर्जुनस्य देहात्मादि भ्रमनिवृत्त्यर्थं । एवं द्वितीयाध्यायोक्तस्य प्रपंचनरूपतया षष्ठान्तानां चतुर्णा मेकपेटिकात्वं एकीकरणार्थं तृतीयारम्भे भाषितम् " तदेवं मुमुक्षुभिः प्राप्यतया वेदान्तोदित निरस्तनिखिलाविद्यादि दोष गन्धा नवधिकातिशया संख्येय कल्याण गुणगण परब्रह्मपुरुषोत्तम प्राप्त्युपाय भूत वेदनोपासनध्यानादिशब्दवाच्या न्तदैकान्तिकात्यन्तिक भक्तिं वक्तुं-

तदंगभूतं ' य आत्मा अपहतपाप्मे' त्यादि प्रजापतिवाक्योदितं प्राप्तुरात्मनो याथात्म्यदर्शनं त न्नित्यताज्ञानपूर्वका संगकर्म निष्पाद्य ज्ञानयोगसाध्य मुक्त " मित्यारभ्य " अतः पर मध्याय चतुष्टयेन इदमेव प्राप्तुः प्रत्यगात्मनो दर्शनं स साधनं प्रपंच्यत " इति ।

असक्त्या लोकरक्षार्थं गुणेष्वारोप्य कर्तृतां ।
सर्वेश्वरेवान्यस्योक्ता तृतीये कर्मकार्यता ॥ ७ ॥

असक्त्या - परमपुरुषप्रीतिव्यतिरिक्त स्वर्गादि फल संग त्याग पूर्वक मित्यर्थः । लोकरक्षार्थं - अनुविधेयानुष्ठानस्य कृत्स्नविद स्वानुष्ठानानु धावनेन अकृत्स्नविद शिष्टलोकस्य निष्प्रमाद लुंटाकरहित घण्टापथ प्रवर्तनार्थ मित्यर्थः । एतेन लोकसंग्रहशब्दो व्याख्यातः । एवं लोकरक्ष णार्थं प्रवृत्ते रन्ततः स्वरक्षापर्यन्तत्वं भाष्योक्तं " अन्यथा लोकनाशजनितं पापं ज्ञानयोगा देनं प्राच्यावये" दिति । गुणेषु - सत्वरजस्तम स्संज्ञकेषु प्रकृति गुणेष्वित्यर्थः । कर्तृतां आरोप्य - स्वस्य देशकालावस्थादि नियतविषय ज्ञान चिकीर्षाप्रयत्नाश्रयत्वलक्षणां कर्तृतां गुणप्रयुक्ततया अनुसन्धायेत्यर्थः । तथाच भाष्यम् " गुणेषु कर्तृत्वानुसन्धानं चेदमेव, आत्मनो न स्वरूपप्रयुक्तमिदं कर्तृत्वं, अपितु - गुणसम्पर्क कृत मिति प्राप्ताप्राप्तविवेकेन गुणकृत मि त्यनुसन्धान"मिति । 'मयि सर्वाणि कर्माणी'त्यत्र अस्मच्छब्दाभिप्रेतं व्यनक्ति (सर्वेश्वरेवान्यस्येति) गुणानां तदाश्रयस्य त्रिगुणद्रव्यस्य तत्संसृष्टस्य वियुक्तस्यच जीवस्य नियन्तरि भगवति तस्या स्तन्मूलत्व भावनया निवेश्ये त्यभिप्रायः। सूत्रकारश्च ' कर्ता शास्त्रार्थवत्वा' दित्यादिभिः आत्मनः कर्तृत्व मुपपाद्य अनन्तरं तस्य परमात्माधीनत्वं ' परात्तु तच्छ्रुते ' रित्याह । सर्वेश्वरे कर्तृत्वानुसन्धान प्रकारश्चैवं भाषितः " इदानी मात्मनां परमपुरुष शरीरतया तन्नियाम्यत्व स्व-

रूपनिरूपणेन भगवति पुरुषोत्तमे सर्वात्मभूते गुणकृतंच कर्तृत्व मारोप्य कर्मकर्तव्यतो च्यत " इति । पिण्डितार्थश्च दर्शतः "स्वकीयेनात्मना कर्त्रा स्वकीयै श्चोपकरणैः स्वाराधनैक प्रयोजनाय परमपुरुष स्सर्वशेषी सर्वेश्वर स्स्वयमेव स्वकीय कर्माणि कारयती " त्यादिना ॥

प्रसंगा त्स्व स्वभावोक्तिः कर्मणो ऽकर्मतास्यच ।
भेदा ज्ञानस्य माहात्म्यं चतुर्थाध्याय उच्यते ॥८॥

स्वशब्देना वतीर्णावस्थो भगवा निह विवक्षितः, तस्य स्वभावः- स्वासाधारणो भावः । स्वस्वभावोक्ति रुच्यत इति ' ओदनपाकः पच्यत ' इति वत । क्रियत इत्यर्थः । कर्मणोऽकर्मता, "कर्म ण्यकर्म यःपश्ये" दित्यादिभिरुक्ता, अकर्मशब्दोत्र तदन्यवृत्त्या कर्मयोगासन्नात्मज्ञान विषयः । अस्यच भेदाः- " दैवमेवापरे यज्ञ " मित्यादिनोक्ताः देवार्चनेन्द्रियनिरोधप्राणायामयागदानहोम तपस्तीर्थसेवा स्वाध्याय तदर्थाभ्यासादिरूपा वर्णाश्रमधर्मेतिकर्तव्यताकाः— यथाज्ञानं यथाशक्ति यथारुचि प्रधानतया परिगृहीताः कर्मयोगावांतर विशेषाइत्यर्थः । ज्ञानस्य माहात्म्यं -" श्रेयान् द्रव्यमया द्यज्ञा " दित्युक्तं प्राधान्यं । अयंच श्लोकः तृतीयसंगति पूर्वकं चतुर्थारम्भे व्याख्यातः " तृतीयाध्याये प्रकृति संसृष्टस्य मुमुक्षो स्सहसा ज्ञानयोगे ऽनधिकारा त्कर्मयोगएव कार्यः, ज्ञानयोगाधिकारिणोपि अकर्तृत्वानुसन्धानपूर्वक कर्मयोग एव श्रेयानिति सहेतुक मुक्तं, शिष्टतया व्यपदेश्यस्यतु विशेषतः कर्मयोगएव कार्यइति चोक्तं, चतुर्थेन इदानी मस्यैव कर्मयोगस्य निखिलजगदुद्धरणाय मन्वन्तरादावेवो पदिष्टतया कर्तव्यतां दृढयित्वा अन्तर्गतज्ञानतया ऽस्यैव ज्ञानयोगाकारतां प्रदर्श्य कर्मयोगस्वरूपं तद्भेदः कर्मयोगे ज्ञानांशस्यैव प्राधान्यं चोच्यते, प्रसंगाच्च भगवदवतार माहात्म्य मुच्यत"इति। ईदशं चावतारयाथात्म्य मत्र निरमंधि,"निखिल

हेयप्रत्यनीककल्याणैकतानस्यापि भगवतो जन्म नेन्द्रजालव न्मिथ्या, अपितु सत्यं, अवतरंश्च भगवा नस्मदादिव न्न ज्ञान संकोचादिमान् भवति, किन्तु अजत्वाव्ययत्व सर्वेश्वरत्वादिकं सर्वं पारमेश्वरं स्वभाव मजहदेव अवतरति, नच - अवतारविग्रहो प्यस्य गुणत्रयमयः प्राकृतः, प्रत्युत अप्राकृतशुद्धसत्वमयः, नचास्य जन्म पुण्यापुण्यरूपेण कर्मणा, अपितु स्वेच्छयैव, नवा कर्मविपाककाले अस्य जन्म, अपितु धर्मग्लान्यधर्मोत्थानकाले, नापि भगवज्जन्मनः सुखदुःखमिश्राणि फलानि, अपितर्हि साधुपरित्राण दुष्कृद्विनाशन धर्मसंस्थापनादीनि, स्वरूपतः प्रकारतो द्रव्यतः कारणतः कालतः प्रयोजनतश्च दिव्यत्वम्, एवं ज्ञानवत श्चैकस्मिन्नेव जन्मनि उपायपूर्त्या नन्तरजन्मप्रतिषेधेन भगवत्प्राप्तिर्गीयते ' जन्मकर्मचमे दिव्य ' मित्यादिना, अतएवहि प्राचेतस पराशर पाराशर्य शुक शौनकादयः परमर्षयः प्राय स्तत्रैव निष्ठां भूयसी माद्रियन्त " इति ॥ ८ ॥

कर्मयोगस्य सौकर्यं शैघ्र्यं काश्चन तद्विधाः ।
ब्रह्मज्ञान प्रकारश्च पंचमाध्याय उच्यते ॥ ९ ॥

तृतीयचतुर्थाभ्यां यथांशं संगतिप्रदर्शनपूर्वक मयं श्लोकः पंचमारम्भे व्याख्यातः " चतुर्थेऽध्याये कर्मयोगस्य ज्ञानाकारतापूर्वकस्वरूपभेदाः, ज्ञानाम्शस्यच प्राधान्य मुक्तं, ज्ञानयोगाधिकारिणोपि कर्मयोगस्या न्तर्गतात्म ज्ञानत्वा दप्रमादत्वा त्सुकरत्वा न्निरपेक्षत्वाच्च ज्यायस्त्वं तृतीय एवोक्तं, इदानीं कर्मयोगस्यात्मप्राप्तिसाधनत्वे ज्ञाननिष्ठाया श्शैघ्र्यं कर्मयोगान्तर्गता कर्तृत्वानुसन्धान प्रकारंच प्रतिपाद्य तन्मूलं ज्ञानंच विशोध्यत " इति । सौकर्यस्यानुद्धरणं पूर्वोक्तानुवादता ज्ञापनार्थं । सौकर्यशब्देनात्र सुखंबन्धात्प्रमुच्यत इत्यस्य हेतु र्दर्शितः । शैघ्र्यन्तु 'योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छती' त्युक्तम्।

अत्र विद्या शब्द इति कर्तव्यतापरः, तथा 'नैव किंचित्करोमी' त्यादे रधिष्ठिका "यत स्सौकर्यात् शैघ्रयाच्च कर्मयोगएव श्रेया नत स्तदपेक्षितं शृण्वि"ति। अकर्तृ त्वानुसन्धान प्रकारशब्दो प्येतत्परः। ब्रह्मशब्दोत्र ब्रह्मसमानाकार शुद्धात्म विषयः । ज्ञानशब्दश्चात्र समदर्शनरूपज्ञानविपाकविश्रान्तः । प्रकारशब्द स्तु तद्धेतुभूतप्रकारार्थः - अतएवहि "येन प्रकारेणा वस्थितस्य कर्मयोगिन स्समदर्शनरूपो ज्ञानविपाको भवति, तं प्रकार मुपदिशती" त्युक्त्वा 'न प्रहृष्ये त्प्रियं प्राप्ये' त्यादिकमवतारितं। षष्ठारम्भस्त्वेवं संगमितः "उक्तः कर्म योगस्सपरिकरः, इदानीं ज्ञानयोगसाध्यात्मावलोकनरूप योगाभ्यास विधि रुच्यते, तत्र कर्मयोगस्य निरपेक्षयोगसाधनत्वं प्रथयितुं ज्ञानाकारः कर्मयोगो योगशिरस्को नूद्यत" इति। एतेन 'योगी युंजीते' त्यतः पूर्वस्य ग्रन्थस्या नुवा-दरूपत्वात् संग्रहे नोपन्यास इति व्यंजितम् ॥ ९ ॥

योगाभ्यास विधिर्योगी चतुर्थां योगसाधनं ।
योगसिद्धि स्स्वयोगस्य पारम्यं षष्ठउच्यते ॥ १०॥

ननु - अत्र पंचार्था स्संगृहीताः - भाष्येतु कथमेकः ; इत्थं। 'स्पर्शा न्कृत्वा बहि र्बाह्या' नित्यादिना पंचमे प्रस्तुतो योगाभ्यासविधि रेवात्र प्रपंच्यतइति तत्प्रधानोय मध्यायः, तदनुबन्धाः प्रसंगा दन्ये प्रतिपाद्यन्त इति। एतेना ध्यायान्तरेष्व प्यनेकानुबन्ध एकैकार्थः प्रधानतमइति सूचितम्। तद्यथा; श्रवणाधिकारी- तन्मोहशमनं - कर्मयोगकर्तव्यत्वं - तदवान्तरभेदः- तदन्त र्गतज्ञानविपाकः- योगाभ्यासविधिः -प्रतिबुद्धप्राधान्यं - त्रिविधाधिकार वेद्योपादेय विभागः - सप्रकारको भक्तियोगः - गुणविभूत्यानन्त्यं - वैश्वरूप्यदर्शनोपायः- भक्त्या रोहक्रमः–विशुद्धक्षेत्रज्ञविज्ञानं - त्रैगुण्यविशोधनं - पुरुषोत्तमवैलक्षण्यं- शास्त्रवश्यत्वं - शास्त्रीयविवेचनं- सारोद्धारः - इति। अतोऽत्र योगाभ्यासविद्ध्यनु

बन्धत्वेन योगे चातुर्विध्यादि प्रदर्शनं। योगी चतुर्धा - 'सर्वभूतस्थ मात्मान' मित्यादि श्लोकचतुष्टयोदित समदर्शन चातुर्विध्यात, तत्र ह्येवं भाष्यम् - " अथ योगविपाकदशा चतुष्प्रकारोच्यत " इति। एवं तत्र समदर्शनविपाक क्रमो ऽभिप्रेतः, आत्मनां ज्ञानत्वानन्दत्वादिभि रन्योन्यसाम्यदर्शनं - शुद्धा वस्थाया मपहतपाप्मत्वादिभि रीश्वरेण साम्यदर्शनं - परित्यक्तप्राकृतभेदाना मसंकुचितज्ञानैकाकारतया ईश्वरेण तदपृथक्सिद्ध विशेषणत्वादिभि रन्योन्यं च साम्यदर्शनं. औपाधिकैः पुत्रादिभि रसम्बन्धसाम्यदर्शनं चेति। योग साधनं - अभ्यासवैराग्यादिकं। योगसिद्धिः - योगभ्रष्टस्यापि प्रत्यवायविरहः पुण्यलोकाद्यवाप्ति र्विच्छिन्नप्रतिसन्धाना द्यनुरूप विशिष्टकुलोत्पत्ति रभिक्रम नाशाभावेन क्रमा च्छेषपूरणेना पवर्गा विनाभाव इत्येवं रूपा। स्वयोग स्य पारम्यं - वक्तु र्भगवतो वासुदेवस्य भजनरूपो योगोऽत्र स्वयोगः - तस्य पारम्यं – स्वापेक्षयोत्कृष्टराहित्यम्। एतच्च मध्यमषट्कप्रतिपाद्यमपि तत्प्रस्ताव नारूपेण ' योगिनामपि सर्वेषा' मिति प्रथमषट्कान्तिमश्लोकेन दर्शितम्। त थाहि तत्र भाष्यम् " तदेवं परविद्यांगभूत प्रजापतिवाक्योदितं प्रत्यगात्मनो दर्शन मुक्तम, अथ परविद्यां प्रस्तौती " ति ॥ १० ॥

स्वयाथात्म्यं प्रकृत्यास्य तिरोधि श्शरणागतिः।
भक्तिभेदः प्रबुद्धस्य श्रैष्ठ्यं सप्तम उच्यते ॥ ११ ॥

तत्र भाष्यम " सप्तमे ताव दुपास्यभूत परमपुरुष स्वरूपयाथा-त्म्यं प्रकृत्यास्य तिरोधानम् तन्निवृत्यर्थं भगवत्प्रपत्ति रुपासकविधा भेदो ज्ञानिन श्रैष्ठ्यं चोच्यत " इति, तत्र प्रकृतिशब्देन " मम माया दुरत्यये " ति मायाशब्दो व्याख्यातः। 'गुणमयी'ति विशेषणा त्सैवहि विवक्षितेति ग-म्यते। श्रुतावपि " अस्मा न्मायी सृजते विश्व मेत त्तस्मिंश्चान्यो

मायया सन्निरुद्ध " इति । प्रस्तुतयो र्मायातद्वतोः " मायान्तु प्रकृतिं विद्या न्मायिनन्तु महेश्वर " मिति स्वयमेव विवरणाच्च । अतो विचित्रसृष्ट्युपकरण वस्तुत्वात् प्रकृता विह मायाशब्दप्रयोग इति भावः । अष्टमारम्भसंगतौ चैतत्श्लोकार्थः स्पष्ट मभिहितः " सप्तमे परस्य ब्रह्मणो वासुदेवस्यो पास्यत्वं निखिलचेतनाचेतन वस्तुशेषित्वं कारणत्व मधीशत्वं सर्वशरीरतया सर्वप्रकारत्वेन सर्वशब्दवाच्यत्वं, सर्वनियन्तृत्वं, सर्वैश्च कल्याणगुणगणै स्तस्यैव परत्वं सत्वरजस्तमोमयै र्देहेन्द्रियत्वेन भोग्यत्वेन चावस्थितै र्भावै रनादिकालप्रवृत्त दष्कृतप्रवाहहेतुकै स्तस्य तिरोधान मत्युत्कृष्टसुकृतहेतुक भगवत्प्रपत्तयाच तन्निवर्तनं सुकृततारतम्येन प्रपत्तिविशेष्या दैश्वर्याक्षर याथात्म्यभगवत्प्राप्त्यपेक्षयाच उपासकभेदं भगवन्तं प्रेप्सो र्नित्ययुक्ततया एकभक्तितयाच अत्यर्थपरमपुरुषप्रियत्वेनच श्रैष्ठ्यं दुर्लभत्वंच प्रतिपाद्य एषां त्रयाणां ज्ञातव्योपादेयभेदांश्च प्रास्तौषी " दिति ॥ ११ ॥

अष्टमश्चैव मवतारितः - " इदानी मष्टमे प्रस्तुतान् ज्ञातव्योपादेयभेदा न्विविनक्ती " ति । तत्रैषसंग्रहः ।

> **ऐश्वर्याक्षर याथात्म्य भगवच्चरणार्थिनाम् ।**
> **वेद्योपादेय भावाना मष्टमे भेद उच्यते ॥ १२ ॥**

ऐश्वर्यमत्र इन्द्रप्रजापतिपशुपतिभोगेभ्योऽतिशयित भोगः, अक्षरयाथात्म्यं - विविक्तात्मस्वरूपं, वेद्यास्तु 'अक्षरं ब्रह्मपरम' मित्यादिनोक्ताः शुद्धात्म स्वरूपप्रभृतयः, उपादेयास्तु - तत्तदिष्टफलानुरूप परमपुरुष चिन्तनान्तिम प्रत्ययगतिचिन्तनादयः, तएव- भावाः- पदार्थाः, तेषां, भेदः - तत्तदधिकारानुरूपो विशेषः ॥ १२ ॥

स्वमाहात्म्यं मनुष्यत्वे परत्वंच महात्मनाम् ।
विशेषा नवमे योगो भक्तिरूपः प्रकीर्तितः ॥ १३ ॥

स्वमाहात्म्यं - ' मयाततमिदं सर्व ' मित्यादिभिः शोधितं । ' अवजानन्ति मां मूढा मानुषीं तनु माश्रितम् । परं भाव मजानन्तो ममाव्यय मनुत्तम ' मिति परत्वस्य मनुष्यदशायाम प्यव्ययत्व मुक्तम् । प्रस्तुतावतारविवक्षया मनुष्यावस्थत्वोक्तिः । तन्मुखेन सर्वेष्वप्यवतारेषु अव्ययः परमोभाव उपलिलक्षयिषितः । उक्तंच श्रीवत्सचिह्नमिश्रैः " परोवा व्यूहोवा विभव उत वार्चावतरणो भवान्वान्तर्यामी वरवरद यो यो भवति वै । ससत्वं सन्नैशान्वरगुणगणान् बिभ्रदखिलान् भजद्भयो भास्येवं सतत मितरेभ्य स्त्वितरथे" ति । ' महात्मानस्तु मां पार्थे ' त्यादिना महात्मनां विशेषो विशोधितः । अत्र भक्तिरूपस्य योगस्यैव प्राधान्यं भाष्योक्तं " उपासकभेद निबन्धना विशेषाः प्रतिपादिताः, इदानी मुपास्यस्य परमपुरुषस्य माहात्म्यं ज्ञानिनां विशेषंच विशोध्य भक्तिरूपस्योपासनस्य स्वरूप मुच्यत " इति ॥ १३ ॥

स्वकल्याण गुणानन्त्यं कृत्स्नस्वाधीनता मतिः ।
भक्त्युत्पत्ति विवृद्ध्यर्था विस्तीर्णा दशमोदिता ॥ १४ ॥

अत्र नवमसंगतिपूर्वकं भाष्यं " भक्तियोग ससपरिकर उक्तः, इदानीं भक्त्युत्पत्तये तद्विवृद्धयेच भगवतो निरंकुशैश्वर्यादि कल्याणगुणानन्त्यं वक्तुं कृत्स्नस्य जगत स्तच्छरीरतया तदात्मकत्वेन तत्प्रवर्त्यत्वंच प्रपंच्यत " इति । एकादशारंभेच भाषितं " एवं भक्तियोगनिष्पत्तये तद्विवृद्धयेच सकलेतर विलक्षणेन स्वाभाविकेन भगवदसाधारणेन कल्याणगुणगणेनच भगवत स्सर्वात्मकत्वं ततएव तद्व्यतिरिक्तस्य कृत्स्नस्य चिदचिदात्मकस्य वस्तुजातस्य तच्छरीरतया तदायत्तस्वरूपस्थितिप्रवृत्तित्वं चोक्तं, तमेतं भगवदसाधारणं स्वभावं कृत्स्नस्य तदायत्तस्वरूपस्थितिप्रवृत्तितांच भगवत्सकाशा

दुपश्रुत्य एवमेवेति निश्चित्य तथाभूतं भगवन्तं साक्षात्कर्तुकामो ऽर्जुन उवाचे"ति ॥ १४ ॥

एकादशे स्वयाथात्म्य साक्षात्कारावलोकनम् ।
तत्त्वमुक्तं विदि प्राप्तयो र्भक्त्येकोपायता तथा ॥१५॥

साक्षात्कारहेतुभूत मवलोकनं साक्षात्कारावलोकनं, अवलोक्यतेनेनेति अवलोकन मिह दिव्यं चक्षुः । विदिप्राप्त्यो रिति दर्शनस्या प्युपलक्षणं । तथाहि गीयते - " भक्त्या त्वनन्यया शक्य अह मेवंविधो ऽर्जुन । ज्ञातुं द्रष्टुंच तत्त्वेन प्रवेष्टुंच परं तपे " ति । अयन्तु संग्रहो द्वादशारंभे संगतिं विवक्षद्भि र्व्याख्यातः " भक्तियोगनिष्ठानां प्राप्यभूतस्य परस्य ब्रह्मणो भगवतो नारायणस्य निरंकुशैश्वर्यं साक्षात्कर्तुकामाय तस्यार्जुनाया नवधिकातिशयकारुण्यौदार्यसौशील्यादिगुणसागरेण सत्यसंकल्पेन भगवता स्वैश्वर्यं यथावस्थितं दर्शितं, उक्तंच तत्त्वतो भगवज्ज्ञानदर्शनप्राप्तीना मैकान्तिकात्यन्तिक भगवद्भक्त्येकलभ्यत्व " मिति ॥ १९ ॥

भक्ते श्श्रैष्ठ्यमुपायोक्ति रशक्तस्यात्म निष्ठता ।
तत्प्रकारास्त्वति प्रीति र्भक्ते र्द्वादश उच्यते ॥१६॥

अत्रच भाष्यम् " अनन्तर मात्मप्राप्तिसाधनभूता दात्मोपासना द्भक्तिरूपस्य भगवदुपासनस्य स्वसाध्यनिष्पादने शैघ्र्या त्सुसुखोपादानत्वाच्च श्रैष्ठ्यं भगवदुपासनोपायश्च तदशक्तस्या क्षरनिष्ठता तदपेक्षिता श्चोच्यन्त" इति । अत्रा तिप्रीतिर्भक्ते रित्यस्योपादान मुपसंहारमात्रता व्यंजनार्थं । उपायोक्तिः - " अथ चित्तं समाधातु " मित्यादिश्लोकद्वयेन कृता । भगवति चित्तं समाधातु मशक्तस्य भगवद्गुणाभ्यास स्तत्राप्यशक्तस्य प्रीतिपूर्वक भगवदसाधारण कर्मकरणं, तस्मिन्न प्यसमर्थस्या त्मनिष्ठेति क्रमः ।

तत्प्रकाराः - कर्मयोगाद्यपेक्षिताः "अद्वेष्टा सर्वभूताना " मित्यादिनोक्ताः उपादेयगुणप्रकाराः, तथाच तत्र भाषितम् " अनभिसंहितफलकर्मनिष्ठस्यो पादेयान् गुणानाहे"ति । अतिप्रीति र्भक्तेः - " येतु धर्म्यामृत मिदं य थोक्त " मित्यादिना अध्यायान्तिमश्लोकेनोक्ता । तदभिप्रेतं चैव मु- क्तम् " अस्मा दात्मनिष्ठा द्भक्तियोगनिष्ठस्य श्रैष्ठ्यं प्रतिपादय न्यथोप क्रम मुपसंहरती" ति ॥ १६ ॥

देहस्वरूप मात्माप्तिहेतु रात्मविशोधनं ।
बन्धहेतु र्विवेकश्च त्रयोदश उदीर्यते ॥ १७ ॥

अत्रभाष्यम् " तत्र ताव त्रयोदशे देहात्मनो स्स्वरूपं देहयाथात्म्य- शोधनं देहवियुक्तात्मप्राप्त्युपायो विविक्तात्मस्वरूपशोधनं तथाविधस्या त्मनश्चा चित्सम्बन्धहेतु स्ततोविवेकानुसन्धानप्रकारश्चोच्यत " इति । अत्र दे- हस्वरूपमित्यनेनैवाभिप्रेतं देहात्मनो स्स्वरूपमिति देहयाथात्म्यशोधनमितिच विवृतं । आत्माप्तिहेतुः 'अमानित्व' मित्यादिभि रुक्तः । आत्मविशोधनं ' ज्ञेयं यत्त त्प्रवक्ष्यामी ' त्युपक्रम्य कृतं । बन्धहेतुस्तु ' कारणं गुणसंगोस्य सदसद्योनिजन्म- सि'त्युक्तः । ' ध्यानेनात्मनिपश्यन्ती' त्यादिना विवेकानुसन्धानप्रकारो यथाधि- कारं दर्शितः ॥ १७ ॥

गुणबन्धविधा तेषां कर्तृत्वं तन्निवर्तनं ।
गतित्रयस्वमूलत्वं चतुर्दश उदीर्यते ॥ १८ ॥

अत्र प्रकृति विशोधन रूपतया संगति पूर्वकं भाष्यं "त्रयोदशे प्र- कृति पुरुषयो रन्योन्यसंसृष्टयोः स्वरूपयाथात्म्यं विज्ञाय अमानित्वादिभि र्भगव

---

१८ - तच्छब्दौ गुणपरौ । स्वशब्दो भगवत्परः ।
प्रपत्तिवशीकृता त्ततएवैश्वर्याक्षरभगवत्प्राप्तयः ।

द्वक्त्यनुगृहीतै बन्धान्मुच्यत इत्युक्तम् , तत्र बन्धहेतुः पूर्वपूर्वसत्वादि गुणमयसुखादिसंग इति चभिहितं ' कारणं गुणसंगोस्य सदसद्योनि जन्म' स्विति, अथेदानीं गुणानां बन्धहेतुता प्रकारो गुणनिवर्तनप्रकारश्चोच्यत " इति । गुणकर्तृत्वादे रिहभाष्येनुक्तिः पूर्ववदेवेतिभाव्यं । सत्वं सुखं ज्ञानसंगेन बध्नाति- रजस्तु कर्मसंगेन- तमस्तु प्रमादालस्य निद्राभिरिति बन्धहेतुता प्रकारः । तेषां कर्तृत्वं प्रागुक्तप्रकारेण प्राप्ताप्राप्तविवेकेन तेष्वारोपितं, तच्चात्र 'नान्यं गुणेभ्यः कर्तार'मिति स्मारितं । गुणनिवर्तनप्रकारस्तु 'मांचयोऽव्यभिचारेण भक्तियोगेन सेवते । सगुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पत' इत्यन्ते नोक्तः । अतएवात्र गतित्रयस्वमूलत्व मित्येतत ' ब्रह्मणोहि प्रतिष्ठाह ' मित्यध्यायान्तिमश्लोकोक्तमेव संगृण्हाति । ततएवहि तत्रैवं भावितं " पूर्वत्र– ' दैवीह्येषागुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते माया मेतां तरन्तित ' इत्यारभ्य गुणत्रयस्य तत्पूर्वकाक्षरैश्वर्यभगवत्प्राप्तीनांच भगवत्प्रपत्त्येकोपायतायाः प्रतिपादितत्वा देकान्तभक्तप्रपत्त्येकोपायो गुणात्यय स्तत्पूर्वको ब्रह्मभावश्चे"ति । ' ऊर्ध्वं गच्छन्ती'त्याद्युक्त गतित्रयविवक्षायान्तु संग्रहक्रम भंगस्स्यात् ॥ १८ ॥

अचिन्मिश्राद्विशुद्धाच्च चेतना त्पुरुषोत्तमः ।
व्यापनाद्भरणात्स्वाम्या दन्यः पंचदशोदितः॥१९॥

अत्र 'अचिन्मिश्रा द्विशुद्धाचे' त्यस्य सूचनीयां संगतिं विवृण्वन् क्षराक्षरशब्दव्याख्यानतां व्यनक्ति " क्षेत्रज्ञा ध्याये क्षेत्रक्षेत्रज्ञयोः प्रकृतिपुरुषयो स्स्वरूपं विशोध्य विशुद्धस्या परिच्छिन्नज्ञानैकाकारस्यैव पुरुषस्य प्राकृतगुणसंगप्रवाहनिमित्तो देवाद्याकारपरिणतप्रकृतिसंबन्धो ऽनादि रि-

---

१९-अचिन्मिश्रः - क्षरशब्दवाच्यः । विशुद्धः - परित्यक्ताचित्संगोऽक्षरशब्दवाच्यो मुक्तात्मा ।

त्युक्तं, अनन्तरे चाध्याये पुरुषस्य कार्यकारणोभयावस्थप्रकृतिसंबन्धो गुण संगमूलो भगवतैव कृत इत्युक्त्वा गुणसंगनिवृत्तिपूर्वकात्मयाथात्म्यावाप्तिश्च भगवद्भक्तिमूलेत्युक्तं, इदानीं भजनीयस्य भगवतः क्षराक्षरात्मक बद्धमुक्त विभूतिमत्तां विभूतिभूता त्क्षराक्षर पुरुषद्वया न्निखिल हेयप्रत्यनीक कल्याणैकतानतया त्यन्तोत्कर्षेण विसजातीयस्य पुरुषोत्तमत्वं वक्तु मारभत" इति। अत्र व्यापनभरणस्वाम्यानि " योलोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर " इति प्रतिपादितानि। एवं प्राधान्यत श्चिदचिदीश्वररूपतत्व त्रयविशोधनं क्रमा दध्यायत्रयेण कृतमि त्यनुसन्धेयम् ॥ १९ ॥

अत्र पूर्वोत्तर समस्त प्रतिष्ठापक ष्षोडशाध्यायार्थ स्संगृह्यते।

देवा सुर विभागोक्ति पूर्विका शास्त्रवश्यता।
तत्वानुष्ठान विज्ञान स्थेम्ने षोडश उच्यते ॥२०॥

एतदभिप्रायेण भाष्यम् " अनन्तर मुक्तस्य कृत्स्नस्यार्थस्य स्थेम्ने शास्त्रवश्यत्वं वक्तुं शास्त्रवश्यतद्विपरीतयो र्देवासुरसर्गयोः विभागं श्रीभगवानुवाचे " ति। अतएव सप्तदश मवतारय न्नेव मन्वभाषत "देवासुरविभागोक्तिमुखेन प्राप्यतत्वज्ञानं तत्प्राप्त्युपायज्ञानंच वेदैकमूल मित्युक्त" मिति। अत्र शास्त्रवश्यता - " तस्मा च्छास्त्रं प्रमाणं ते कार्याकार्य व्यवस्थितौ। ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि"ति अध्यायान्तिमश्लोकेनोक्ता॥२०॥

अशास्त्र मासुरं कृत्स्नं शास्त्रीयं गुणतः पृथक्।
लक्षणं शास्त्र सिद्धस्य त्रिधा सप्तदशो दितं ॥२१॥

अत्र भाष्यम् " इदानी मशास्त्रविहितस्या सुरत्वेन अफलत्वं शास्त्रविहितस्यच गुणत स्त्रैविध्यं शास्त्रसिद्धस्य लक्षणं चोच्यत " इति। शास्त्रं यस्य-

विधायकत्वेन नास्ति तदशास्त्रमित्यभिप्रायेणा शास्त्र विहितस्येत्युक्तं । ओन्त-त्सादिति शास्त्रासिद्धस्य त्रिविधं लक्षण मुक्तम् ॥ २१ ॥

इश्वरे कर्तृता बुद्धि स्सत्वोपादेयतांतिमे ।
स्वकर्मपरिणामश्च शास्त्र सारार्थ उच्यते ॥ २२ ॥

तदेत त्पूर्वाध्यायत्रंगतिप्रदर्शनपूर्वकंव्याचष्टे " अतीतेना ध्याय द्र-येन अभ्युदय निश्श्रेयस साधनभूतं वैदिकमेव यज्ञतपोदानादिकं कर्म, नान्यत्, वैदिकस्य कर्मण स्सामान्यलक्षणं प्रणवान्वयः, तत्र मोक्षाभ्युद यसाधनयो र्भेद स्तत्सच्छब्दनिर्देश्यत्वेन, मोक्षसाधनंचकर्म फलाभिसन्धि रहितं यज्ञादिकं, तदारम्भ स्सत्वोद्रेका द्भवति, सत्वोद्रेकश्च सात्विकाहार सेवयेत्युक्तं, अनन्तरं मोक्षसाधनतया निर्दिष्टयो स्त्यागसन्यासयोरैक्यं, त्या गस्यच स्वरूपं भगवति सर्वेश्वरे सर्वकर्मणां कर्तृत्वानुसन्धानं सत्वरजस्तमसां कार्यवर्णनेन सत्वगुणस्योपादेयत्वं स्ववर्णोचितानां कर्मणां परमपुरुषाराधन भूतानां परमपुरुषप्रातिनिर्वर्तनप्रकारः कृत्स्नस्यच गीताशास्त्रस्य सारार्थो भक्तियोग इत्येते प्रतिपाद्यन्त" इति । अत्र त्यागसन्नयासशब्दा वेकार्थाविति भगवदुक्तेनोत्तरेण ख्यापितम् भाष्ये । सर्वेश्वरे कर्तृत्वानुसन्धानंच 'दैवं चैवात्रा पंचम' मित्यत्रैव दर्शितं–" अत्र - कर्महेतुकलापे, दैवंपंचमं - परमात्मा

२१- (अशास्त्रमिति) सप्तदशोदितमिति प्रत्येक मन्वेति । एत त्सर्वं सप्तदशोदितमिति वाऽन्वयः । वेदबाह्यागमोक्तं वैदिकमपि अन धिकारिभि र्देशकालद्रव्यक्रियादिनियमानादरेण यथातथावा नुष्ठितंच अशास्त्रं, तदासुरं - अफलंच । अतथाभूतंच शास्त्रीयम् । सत्वरजस्त-मोरूपगुणाधीनश्रद्धाकार्यत्वात् त्रैविद्ध्यम् । तेषांच प्रणवान्वयात् तत सतशब्दयोगाच्च व्यावृत्तत्व मवैदिकेभ्यः ॥

ऽन्तर्यामी कर्मनिष्पत्तौ प्रधानहेतु रित्यर्थः । उक्तंहि ‘ सर्वस्यचाहं हृदि सन्निविष्टो मत्त स्समृतिर्ज्ञानमपोहनं चे’ ति । वक्ष्यतिच ‘ ईश्वरस्सर्वभूतानां हृद्देशेर्जुन तिष्ठति । भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ’ इति । परमात्मायत्तंच जीवात्मनः कर्तृत्वं ‘परात्तु तच्छ्रुतेः ’ इति प्रतिपादितम् । नन्वेवं परमात्मायत्ते जीवात्ममः कर्तृत्वे जीवात्मा कर्म ण्यनियोज्यो भवतीति विधिनिषेधशास्त्रा ण्यनर्थकानि स्युः ? इदमपि चोद्यं सूत्रकारेण परिहृतम् ‘ कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धा वैयर्थ्यादिभ्य’ इति । एतदुक्तं भवति – परमात्मना दत्तै स्तदाधारैश्च करणकळेबरादिभि स्तदाहितशक्तिभिः स्वयंच जीवात्मा तदाधार स्तदाहितशक्तिस्सन् कर्मनिष्पत्तये स्वेच्छया करणा द्यधिष्ठानाकारं प्रयत्नंचा रभते । तदन्तरवस्थितः परमात्मा स्वानुमतिदानेन तं प्रवर्तयतीति जीवस्यापि स्वबुद्ध्यैव प्रवृत्तिहेतुत्व मस्ति । यथा गुरुतरशिलामहीरुहादिचलनादिफलप्रवृत्तिषु बहुपुरुषसाध्यासु बहूनां हेतुत्वं विधिनिषेधभाक्त्वं चेति ” इति । तत्र शास्त्रसारार्थः ‘सर्वगुह्यतम’मित्यादिना सादरं सम्मुखीकृत्य ‘ मन्मना भव मद्भक्तः’ - ‘ सर्वधर्मान् परित्यज्ये’ ति श्लोकद्वयेन शिष्टः । चरमश्लोकार्थश्च तात्पर्यचन्द्रिकायां निक्षेपरक्षायां चास्माभिः यथाभाष्यं यथासंप्रदायंच समस्तपरपक्षप्रतिक्षेप

२२-अत्र ‘त्यागन्यासैक्य तत्स्वरूपानुक्ति रीश्वरे कर्तृताबुद्धे श्शेषतया तदुपन्यासादिति मन्तव्यम् । सत्वोपादेयत्व मत्र तात्पर्यवृत्त्याभिधीयते । ’ इति तात्पर्यचन्द्रिका । ज्ञानकर्मकर्तृबुद्धिधृतिसुखानां सत्वरजस्तमोमूलानां भेदस्वरूपादिमुखेन गुणकार्यकथनेन सत्वस्यैवोपादेयत्व मर्थात्प्रतिपादितं भवतीत्यभिप्रायः । स्वकर्माणिच स्वस्ववर्णाश्रमोचितानि नित्यनैमित्तिकरूपाणि, तेषां–परिणामो भगवत्प्राप्तिनिर्वर्तनप्रकारः । भक्तिप्रपत्तिरूपोपायविवेक श्शास्त्रसारार्थः ।

पूर्वक मुपपादितः । तत्राय मस्मदीय संग्रहः "सुदुष्करेण शोचेद्यो येन येनेष्टहेतुना । स स तस्याहमेवेति चरमश्लोक संग्रह" इति । साराथौं भक्तियोग इति भाष्ये त्वंगाधिकारे प्रपत्तिप्रत्यपि भक्ते रंगित्वेन प्राधान्यात् ॥२२॥

अथ दशभि श्श्लोकै स्सुखग्रहणाय कर्मयोग ज्ञानयोग भक्तियोगादीनां स्वरूपादिकं विविनक्ति ।

तत्र कर्मयोगस्य लक्षणं पूर्वमेव दर्शितमिति कृत्वा तत्तदधिकारिणां ज्ञानशक्ति योग्यतानुगुण्येन यथाधिकारं परिग्रहार्थं च चतुर्थोक्ता नवांतरभेदा ननुक्तानपि सर्वा नादिशब्देन संगृह्य न्नुदाहरति ।

कर्मयोग स्तपस्तीर्थ दानयज्ञादि सेवनम ।

आफलोदयं सादरं निरन्तरपरिग्रहोऽत्र सेवनम ॥

अथ तत्साध्यस्य ज्ञानयोगस्या धिकारिप्रदर्शनपूर्वकं लक्षणमाह ।

ज्ञानयोगो जितस्वांतैः परिशुद्धात्मनिस्थितिः ॥२३॥

निरन्तर चिन्तन रूपेणेति शेषः । तेन तत्फल तदुपाय ज्ञानाभ्यां व्यवच्छेदः ॥ २३ ॥

भक्तियोगः परैकांत प्रीत्या ध्यानादिषु स्थितिः।

अथांतरंगैस्सह भक्तियोगं लक्षयति । परस्मिन् ब्रह्मण्येकांतेन प्रीतिः परैकांतप्रीतिः । तेन महनीयविषये प्रीति भक्तिरिति लक्षणं सूचितम । "स्नेहपूर्व मनुध्यानं भक्तिरित्यभिधीयत" इत्याद्यनुसारेण लक्ष्यस्वरूपं ध्यानशब्देनोक्तं । आदिशब्दे नार्चनप्रणामाद्यन्तरंगवर्गसंग्रहः । उक्तंच वेदार्थसंग्रहे " अशेष जगद्धितानुशासने श्रुतिनिकरशिरसि समधिगतोय मर्थो जीवपरमात्मयाथात्म्य ज्ञानपूर्वक वर्णा श्रम धर्मेति कर्तव्यताक परम पुरुष चरण युगळ

ध्यानार्चन प्रणामादि रत्यर्थप्रिय स्तत्प्राप्ति फल" इति । ननु-कर्मयोगे प्यात्मज्ञान माराध्यप्रीतिश्चानुवर्तते, ज्ञानयोगेप्यन्तःकरणशुद्ध्यर्थं नियतं कर्म नत्याज्यं, तदाराध्येश्वर भक्तिश्च, एवं भक्तियोगेपि तदितरानुवृत्ति रिसद्धा, अतो विभागानुपपत्ति रित्यत्राह।

त्रयाणा मपि योगानां त्रिभि रन्योन्य संगमः॥२४॥

प्रधानभूते कस्मिंश्चि त्क्षीरशर्करान्यायेन गुणतया इतरानुप्रवेशो न विभागभञ्जक इति भावः ॥ २४ ॥

नन्वेवं परैकांतप्रीति स्त्रिष्वपि समाना, ऐकांत्यंचा नन्य देवताकत्वपर्यन्तं । यथोक्तंमोक्षधर्मे " ब्रह्माणं शितिकण्ठंच याश्चान्या देवता स्स्मृताः । प्रतिबुद्धानसेवन्ते यस्मात्परिमितं फल " मिति । आश्वमेधिकेच " अनन्यदेवताभक्ता येमद्भक्तजनप्रियाः । मामेव शरणंप्राप्ता स्तेमद्भक्ताः प्रकीर्तिता " इति । तलश्चा ग्नींद्रादि नानादेवता संकीर्णानां वर्णाश्रम धर्माणा मैकांत्यविरोधात त्रिष्वपि योगेषु तत्परित्यागः प्राप्त इत्यत्राह ।

नित्यनैमित्तिकानांच पराराधन रूपिणां ।

अत्र त्रिभिस्संगम इत्यर्थतो बुद्ध्या विभज्या न्वेतव्यं ॥ अयमभिप्रायः-नियतस्य यतःप्रवृत्तिराचार प्रभवः " वर्णाश्रमाचारवते " त्यादिभिर्वर्णाश्रम धर्मेति कर्तव्यताकत्वसिद्धेः , अग्नीन्द्रादिशब्दानामपि प्रतर्दनविद्यान्यायेन तच्छरीरकपरमात्मपर्यन्तत्वानुसन्धानात " साक्षाद प्यविरोधं जैमिनि " रिति न्यायेन यज्ञाग्रहराध्यायोक्तप्रक्रिययाच साक्षात्प्रतिपादकत्वेनवा तत्तत्कर्मणामपि परमपुरुषाराधनत्वसम्भवात , तदनुष्ठातु रनन्याराधकत्वसिद्धे रैकान्त्यं प्रतिष्ठितमिति । एतेन कर्मयोगेपि नित्यनैमित्तिकाना मितिकर्तव्यतात्वं सूचितम् । तथा 'सर्वे प्येते यज्ञविद' इति श्लोके भाष्यं ' द्रव्ययज्ञ-

प्रभृतिप्राणायामपर्यन्तेतु कर्मयोगभेदेषु स्वसमीहितेषु प्रवृत्ता एते सर्वे ‘सहयज्ञैः प्रजा स्सृष्ट्वे ’ त्यभिहितमहायज्ञपूर्वकनित्यनैमित्तिकरूपयज्ञविद स्तन्निष्टा स्ततएव क्षपितकल्मषा यज्ञशिष्टामृतेन शरीरधारणं कुर्वन्तः एते कर्मयोगे व्यापृता स्सनातनं ब्रह्म यान्ती ” ति । ‘एवं बहुविधा यज्ञा’ इत्यत्र चोक्तं “ एवंहि बहुप्रकाराः कर्मयोगाः ब्रह्मणो मुखे विततः , आत्मयाधात्म्यावाप्तिसाधनतया स्थिताः, ता नुक्तलक्षणा नुक्तभेदा न्कर्मयोगां त्सर्वान् कर्मजान् विद्धि, अहरह रनुष्ठीयमान नित्यनैमित्तिककर्मजान् विद्धी” ति । ‘भोक्तारं यज्ञतपसा’ मिति श्लोक मवतारयं श्चैवमाह “ उक्तस्य नित्यनैमित्तिककर्मेति कर्तव्यताकस्य कर्मयोगस्य योगशिरस्कस्य सुशकत्वमाहे”ति ॥

अथ त्रयाणां योगानां परमभक्तिजनने प्रत्यगात्मदर्शनरूपमवान्तरव्यापारं सहेतुक माह ।

आत्मदृष्टेस्त्रयोप्येते योगद्वारेण साधकाः ॥ २५ ॥

योगोऽत्र समाधिरूप मन्तःकरणैकाग्र्यं, तत्साध्य साक्षात्कारो दृष्टिः। ननु- यद्यपि कर्मयोगस्य ज्ञानयोगव्यवधान मन्तरेणापि आत्मावलोकन साधनत्वं पूर्वमेवोक्तं , तथापि भक्तियोगस्य तत्साधकत्व मयुक्तम् , तस्या त्मावलोकन पूर्वकत्वादिति चेत् : मैवं - भक्तिनिष्ठाया एव पर्वभेदेन सर्वोपपत्तेः ज्ञानदर्शनप्राप्तीना मविशेषेण भक्तिसाध्यत्व मुच्यते । तच्च पर्वभेद मन्तरेण नोपपद्यते । अतएव ह्यात्मावलोकनानन्तरं ‘ मद्भक्तिं लभते परा’ मिति परशब्देन विशेष्यते । अत आत्मावलोकनरहितस्या प्यद्यतन भक्तानामिव स्तुतिनमस्कार कीर्तनादिनिष्ठया सेवारूपत्वा दभिव्यक्तया भक्तिशब्दाभिलप्यया आत्मावलोकनमुपपद्यते । दर्शितश्च परावरभक्तिविभागो वेदार्थसंग्रहे “ सोयं परब्रह्मभूतः पुरुषोत्तमः निरतिशयपुण्यसंचयक्षीणाशेष जन्मोपचितपापराशेः परमपुरुष चरणारविन्द शरणागतिजनित तदाभि

मुख्यस्य सदाचार्योपदेशोपबृंहित शास्त्राधिगत तत्वयाथात्म्यावबोध पूर्वका हरहरुपचीयमान शमदम शौचक्षमार्जव भयाभयस्थानविवेक दया हिंसा द्यात्मगुणोपेत वर्णाश्रमोचित परमपुरुषाराधनरूप नित्यनैमित्तिक कर्मोपसं- भूत निषिद्धपरिहारनिष्ठस्य परमपुरुषचरणयुगळ न्यस्तात्मात्मीयस्य तद्भ क्तिकारिता नवरतस्तुतिनमस्कृति यतनकीर्तनगुणश्रवण वचनध्याना र्चनप्रणामादिभिः प्रीतः परमकारुणिकः पुरुषोत्तम प्रसाद विध्वस्त स्वांत ध्वान्तस्या नन्यप्रयोजनानवरत निरतिशयप्रिय विशदतम प्रत्यक्षतापन्ना नुध्यानरूप भक्त्येकलभ्य इति, तदुक्तं परमगुरुभि र्भगवद्यामुनाचार्यपादैः 'उभयपरिकर्मित स्वान्तस्य ऐकान्तिकात्यन्तिकभक्तियोगलभ्य'इति"इति ॥२५॥

एवं यथाधिकारं परिगृहीतै स्त्रिभि रात्मावलोकनसिद्धिद्वारा परम- भक्त्युत्पादनप्रकारं परमभक्तेरेव प्रकृष्टायाः परमप्राप्तिसाधनत्वंच दर्शयति ।

निरस्तनिखिलाज्ञानो दृष्ट्वा त्मानं परानुगम् ।
प्रतिलभ्य परां भक्तिं तयैवाप्नोति तत्पदम् ॥ २६ ॥

उपायविरोधि सर्वाज्ञानवृत्ति रिह निरस्त निखिलाज्ञानेत्यनेन विवक्षि- ता । परानुगं, परानुचरं, शेषतैकरसमित्यर्थः । यथोच्यते " नायं दे- वो नमर्त्योवा नतिर्यक् स्थावरोपिवा । ज्ञानानन्दमयस्त्वात्मा शेषोहिपरमा- त्मन " इति । आहच सर्वज्ञो मन्त्रराजपदस्तोत्रे–" दासभूता स्स्वतस्सर्वे ह्या- त्मानः परमात्मानः । अतोह मपिते दास इति मत्वा नमाम्यह " मिति । प्रतिलभ्य- परमात्मसकाशा त्प्राप्येत्यर्थः । तया - परमभक्तिरूप विपाकापन्न येतिशेषः । अत्र एवकारेण नैरपेक्ष्य मव्यवहितत्वंच सूच्यते । तत्पदं - तच्चर णं , पद्यतइति व्युत्पत्या पदं - मुक्तप्राप्यतया सिद्धं परमपुरुषस्या प्राकृतं स्थानं, स्वरूपंवा । तदेतत श्लोक द्वयेनगीयते- ' ब्रह्मभूतःप्रसन्नात्मा नशोचति नकांक्षति । समः स्सर्वेषु भूतेषु मद्भक्तिं लभतेपरां ॥ भक्तयामा मभिजानाति यावान्यश्चास्मि तत्वतः । ततोमां तत्वतोज्ञात्वा विशतेतदनंतर मिति ॥ २६ ॥

एवं भक्ते र्मोक्षसाधनत्व मुक्तं, सैव मध्यम षट्कोक्त प्रकारेणा चिद्द्रव्यपरिणामविशेषानुभवरूप स्यैश्वर्यास्यापि साधिकेत्याह ।

भक्तियोग स्तदर्थीचे त्समग्रैश्वर्य साधकः ।

एकस्य कथं परस्परविरुद्धयो र्बन्धमोक्षयो स्साधनत्व मित्यत्रोक्तम् (तदर्थीचेदिति) एकस्यैव तत्तत्फलरागवशा द्विचित्रफलसाधनत्वं 'सर्वेभ्यः कामेभ्यो ज्योतिष्टोम' इत्यादिष्वपि प्रसिद्धम् । ब्रह्मादिप्रदेयैश्वर्येभ्यः समधिकत्वमिह समग्रत्वम् । दृष्टंच लोके सम्राट्सामन्तसेवयो स्सिद्धितारतम्यं । नच हिरण्यगर्भादयो हिरण्यगर्भादिपदं प्रदातुं प्रभवन्ति, स्वयमेव ह्युक्तं ब्राह्मणा 'प्राजापत्यं त्वया कर्म सर्वं मयि निवेशित' मिति । अन्यत्र चोक्तम् 'युगकोटिसहस्राणि विष्णु माराध्य पद्मभूः । पुन स्त्रैलोक्य धातृत्वं प्राप्तवानिति शुश्रुम ' इत्यादि । रौद्रस्यापि पदस्य भगवत्प्रत्तत्व माम्नायते 'अस्य देवस्य मीढुषो वयो विष्णो रेषस्य अवभृथे हविर्भिः । विदेहिरुद्रो रुद्रियं महित्वं यानेष्टं वर्ति रश्विनाविरावत ' इति । अस्य स्वेतरसमस्तव्यावृत्तातिशयतया श्रुत्यादिप्रसिद्धस्य, देवस्य - अनितरसाधारणात्यद्भुता प्रतिहतक्रीडाविजिगीषाव्यवहार द्युतिस्तुतिप्रभृति नित्यनिरवद्यानिरातिशयानन्त मंगळगुणमहोदधेः, मीढुषः - मिह सेचने - सेक्तुः - दातुः, उदारस्येत्यर्थः, वयः - अवयवतया शाखाभूतः, शरीरतयांगभूत इत्यर्थः । 'वया इशाखा' इति यास्कः । अस्य— विष्णो स्सर्वव्यापनशीलतया सर्वान्तर्यामिभूतस्य नारायणस्य, 'वृक्षइव स्तब्धो दिवि तिष्ठत्येक स्तेनेदं पूर्ण' मितिहि श्रूयते । एषस्य- एषणीयस्य, प्रार्थनीयस्य, अभिमतफलार्थं याचनीयस्येत्यर्थः । अवभृथे हविर्भिः - सर्वमेधाख्ये यागे हविर्भि र्विष्णवे समर्पितैः स्वात्मपर्यन्तै र्हविर्भिः, विदेहि, विदे - लेभे - हीति हेतौ, प्रसिद्धौवा । रुद्रियं - रुद्रस्य सम्बन्धि, स्वसम्बन्धीत्यर्थः । यद्वा – ब्रह्मरुद्रेन्द्रादीनां प्रवाहानादित्वात् रुद्र

जातिसम्बन्धितया प्रथितं, महित्वं - महिमान मित्यर्थः । एतदुपबृंहणाभिप्रायेण चोक्तं महाभारते " महादेव स्सर्वमेधे महात्मा हुत्वा त्मानं देवदेवो बभूवे" ति । "एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ । तदादर्शित पन्थानौ सृष्टिसंहारकारिणौ " इत्यादिभिश्च सर्वत्रा यमर्थः प्रसिद्ध इत्यलं विस्तरेण ॥

एव मचित्तत्वानुभवरूपैश्वर्यसाधकत्वं भक्ते रुक्तं, अथ चेतन रूपात्मतत्वानुभवरूपार्वाचीनकैवल्यस्य साधनत्वं तस्याः प्रदर्शयन् ज्ञान योगकर्मयोगयोर प्यर्थस्वभावा त्परमपुरुषप्रीतिद्वारेण तत्साधनत्वं युक्त मित्य भिप्रायेणाह ।

आत्मार्थीचे त्त्रयोप्येते तत्कैवल्यस्य साधकाः ॥२७॥

अचिदनुभवा दीश्वरानुभवाच्च विविक्तरूपोऽनुभव इह तत्कैवल्यशब्देन विवक्षितः । अत्रच वक्तव्यं सर्वं तात्पर्यचन्द्रिकायां प्रपंचित मस्माभिः ॥ २७ ॥

एव मति शयितैश्वर्य कैवल्य भगवत्प्राप्तयर्थिना मधिकर्तव्याया भक्ते-स्सारभूतं साधारणं रूपं निष्कर्षयति ।

ऐकान्त्यं भगवत्येषां समान मधिकारिणां ।

एकांत्य मत्रा नन्य देवताकत्वं । "चतुर्विधा ममजना भक्ता एवहि तेस्मृताः । तेषामेकांतिन श्श्रेष्टास्तेचैवानन्यदेवता " इत्यनुगीतावचनम् ज्ञानिना मैकांत्यस्य नित्यत्वाभिप्रायेण । अत्रतु यावत्स्वाभिमत फललाभ मैकांत्यं समान मित्युच्यते । एतेन कर्मयोग ज्ञान योगा वस्थयोर प्यैकांत्यं सिद्धम् । सर्वत्र भगवत्प्रपत्तिपूर्वकत्वा वश्यंभावात् ॥

एव मचिदनुभवा त्स्वानुभवाच्च विलक्षण मीश्वरानुभव मभ्यर्थयमानस्या-

धिकार्यंतर ब्यावृत्ता त्यन्तिकत्वलक्षण भक्ति वैशिष्टया दव्यवधानेना त्यंतिक तत्प्राप्तिमाह ।

यावत्प्राप्तिपरार्थीचे त्तदेवानन्त्यमश्नुते ॥ २८ ॥

फलांतरसंगरूपां तराया नुपहत श्चे दव्यवधानेन भगवन्तं प्राप्य पुन स्संसारं न प्राप्नोतीत्यर्थः । पदाभिप्रायेण तदिति नपुंसकत्वं ॥२८॥

अथ " येतु शिष्टा स्त्रयो भक्ताः फलकामा हि.ते मताः । सर्वेच्यव-नधर्माणः प्रतिबुद्धस्तु मोक्षभा " गित्यनुगीतस्य ' यावत्प्राप्ति परार्थीचेदि' त्यु-क्त स्याधिकारिणो नन्य साधारणं विशेष मनुष्ठान फलप्राप्तयोश्च प्रकारं त-त्रैवच तात्पर्येणास्य शास्त्रस्या पवर्गशास्त्रत्वं चतुर्भि विवृणोति ।

ज्ञानीतु परमैकान्ती तदायत्तात्मजीवनः ।
तत्संश्लेषवियोगैक सुखदुःखस्तदेकधीः ॥ २९ ॥

एतेन" ज्ञानीत्वात्मैवमेमतं " " मच्चित्तामद्गतप्राणा"इत्यादिकं स्मारितम् । परमश्चासा वेकांतीचेति परमैकांती,एकांतिषु उत्तमइत्यर्थः । परमएकांतोनन्यत्वमस्या स्तीतिवा । न केवल मनन्यदेवताकत्वं, अपि त्वनन्यप्रयोजनत्व मप्यस्तीत्यर्थः । संश्ले-षोत्र मनोवाक्कायसाध्य तदभित शास्त्रचोदित सपर्यामुखेन । वियोगोपि त द्विच्छेदः । यदाहु र्महर्षयः " यन्मुहूर्तं क्षणं वापि वासुदेवो नचिन्त्यते । सा हानि स्तन्महच्छिद्रं साभ्रान्ति स्साच विक्रिया " "एकस्मिन्न प्यति क्रान्ते मुहूर्ते ध्यानवर्जिते । दस्युभि र्मुषितेनेव युक्त माक्रन्दितुं भृश " मिति । तस्मिन्नेव धी श्चिन्ता यस्य तदेकधीः ॥ २९ ॥

भगवद्ध्यान योगोक्ति वन्दनस्तुतिकीर्तनैः ।
लब्धात्मा तद्गतप्राण मनोबुद्धीन्द्रियक्रियः ॥३०॥

ध्यानमिहानुचिन्तनं । भोग स्तन्मूल मवलोकनं , विशिष्टक्षेत्रादि वर्तिनः परस्याभिगमनंवा । यदाहुः " पादौ नृणान्तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरे र्यौ " " योगस्तु द्विविधः प्रोक्तो बाह्य माभ्यन्त रं तथा । बाह्यं बहिः क्रियापेक्ष मान्तरं ध्यान मुच्यत " इति । उक्ति श्शुश्रूषुभ्यो ऽधिकारिभ्यः प्रतिपादनम् । वन्दनं त्रिभिः करणैः प्रणाम इत्यर्थः । स्तुति र्गुणकथनं । कीर्तनं तत्तद्गुणविभव चेष्टितादिगर्भाणां तदसाधारणनामधेयानां संकीर्तनं, तै र्लब्धात्मा - अन्यथा अवस्तुभूत मात्मानं मन्यमान इति भावः । प्रशिथिलकरणकळेबरादिको भवेदितिवा । प्राणादीनां क्रियाया स्तद्गतत्वं तदनुभवाभावे शैथिल्यादिति भाव्यम् । अथवा " यत्करोषि यदश्नासी " ति न्यायेन स्वभावार्थ शास्त्रप्राप्तानां कर्मणां भगवति समर्पणं , मनः संकल्प विकल्प वृत्तिकं अन्तःकरणं, तस्याध्यवसायात्मिका वृत्ति र्बुद्धिः, यद्वा , तदेवात्रा ध्यवसायवृत्तिविशिष्टं बुद्धि रित्युच्यते । यथोक्तं शारीरकभाष्ये " अध्यवसायाभिमान चिन्तावृत्ति भेदा न्मनएव बुद्ध्यहंकार चित्तशब्दैः व्यपदिश्यत " इति । इन्द्रियशब्दोऽत्र गोबलीवर्दन्याया द्बाह्येन्द्रियविषयः ॥३८॥

एवं विधस्याधिकारिणः " सततं कीर्तयन्तो मा " मित्युक्तप्रक्रियया वर्णाश्रमधर्माणामपि लोप स्स्यादित्यत्राह ।

निजकर्मादि भक्त्यन्तं कुर्यात्प्रीत्यैव कारितः ।

नित्यदास्यैकस्वभावस्य मुक्तस्येवा स्यापि तत्परिचरणं तदाज्ञानुवर्तन प्रीत्यैव यथाशास्त्रं यथाधिकारं यथावसरंच सर्वं घटते, अन्यथा " सन्ध्याहीनो ऽशुचिर्नित्य मनर्ह स्सर्वकर्मस्वि " त्यादिभि र्भगवदर्चनादाव प्यनधिकारप्रसंगात् । तस्मा द्योग्यतासिध्यर्थं लब्धांशस्य शैथिल्यपरिहारार्थं उत्तरोत्तरोपचयार्थं सुदृढसिद्धोपायस्यापि स्वानुष्ठानेन परप्रवर्तनरूप भगव

दाज्ञानुपालनार्थं अवश्यकर्तव्यानामपि कर्मणां विधिपरामर्शमन्तरेण प्रियतम सुहृत्पुत्रा द्युपलालनव त्प्रीतिरेव ज्ञानिनः प्रयोजिकेतिभावः । तथाच शिष्यते " यथायुवानं राजानं यथाच मदहस्तिनं । यथाच पुत्रं दयितं तथैवोपचरे द्धरि " मिति । " यथा प्रियातिथिं प्राप्तं भगवन्तं तथार्चये " दिति संहितान्तरम् ॥

एवकाराभिप्रेत मन्यदपि विवृणोति ।

उपायतां परित्यज्य

उक्तव्यापारन्यायेन स्वयं स्वादुत्वात् क्षणिकस्य कालांतरभावि फलसाधनत्वा नुपपत्ति दर्शनाच्च नास्य स्वव्यापारे मोक्षोपायता बुद्धिरपि स्या दिति भावः । अन्तत स्तैस्तै राराधितो भगवानेवांहे सर्वत्रोपायः, न पुनः क्षणिकं तत्क्रियास्वरूपं तत्साध्यं किंचि त्तत्प्रीत्यतिरिक्त मप्रामाणिक मपूर्वादिकंवा ॥

अत स्तस्मिन्नेव 'मामेकं शरणंव्रजे'ति वक्त र्युपायता बुद्धिः कार्येत्याह ।

न्यस्येद्देवेतु तामभीः ॥ ३१ ॥

अनाश्रितानां बन्धन माश्रितानां मोचनंच भगवतः स्वमाहात्म्यानुगुण लीलयैवे त्यभिप्रायेणाह (देवइति) 'तंहवैदेव'मिति शरण्यविषय श्रुतिसूचनार्थ मत्र देवशब्दः । अपार कारुण्य सौशील्य वात्सल्यौ दार्यादिगुण निधौ " मित्रभावेन संप्राप्तं" "सकृदेव प्रपन्नाय" " अपिचेत्सु दुराचारः" "क्षिप्रं भवति धर्मात्मा" "मन्मनाभव मद्भक्तः " "सर्वधर्मा न्परित्यज्ये " ति वक्तरि तस्मिन्नेव अशरण्यशरण्ये स्वयमुपायतयावस्थिते ऽ स्वापराध तत्स्वातंत्र्य तत्संकल्प किंकर हिरण्यगर्भ रुद्रेन्द्रादि क्षुद्रेश्वरादि निमित्तभयं नकर्तव्यमि त्यभिप्रायेणाह (अभीरिति) ॥ ३१ ॥

एवं स्थितस्य यथा मनोरथ मन्तरायानुपहतस्य फलसिद्धि माह ।

एकान्तात्यन्त दास्यैक रति स्तत्पदं माप्नुयात ।

उक्तंच परमैकांतिनां परिचरणप्रकार मनुक्रम्य तस्य निर्विघ्नत्वं श्री पौष्करे "प्रवृत्तिकालादारभ्य आत्मलाभावसानिकं। यत्रावकाशो विघ्नानां विद्य ते न कदाचन" इति ।एतदेवाभिप्रेत्योक्तं श्रीसात्वते " संकल्पादेवभगवान् तत्त्वतो भावितात्मनां । व्रतान्त मखिलं कालं सेचव त्यमृतेनतु ॥ ज्ञात्वैव वन्धं मर्त्येन भवितव्यं सदैवहि । प्राप्तये सर्वकामानां संसारभय भीरुणा " इति । अतः "श्रयतेखलु गोविन्दे भक्तिमुद्वहतां नृणां । संसारन्यूनताभीता स्त्रिदशाः परिपंथिनः " " सत्यं शतेन विघ्नानां सहस्रेण तथातपः । विघ्ना युतेन गोविन्दे नृणांभक्ति निवार्यत". इत्यादिकं परभक्त्यवस्थातः प्राचीना वस्थाविषयं नेतव्यं। अत्र भूमविद्यायामिव ऐश्वर्याद्यर्वाचीनपुरुषार्थ प्रतिपादनं परमपुरुष प्राप्तिरूप प्रधानतम पुरुषार्थपारम्यसमर्थनार्थतया । उक्तंच श्री सात्वते 'प्रत्ययार्थंच मोक्षस्य सिद्धयं स्संप्रकीर्तिता" इति ॥

अतो मोक्षसाधनत्वमेवास्य शास्त्रस्ये त्यभिप्रायेणाह ।

तत्प्रधान मिदं शास्त्रं

अत्र यथार्हं न्यासोपासनरूप प्रापकनिष्ठाप्राप्तृतया निर्दिष्टः पर मैकांतीवा तत्प्राप्यंवा तच्छब्देन परामृश्यते ॥

अथात्र सौगताहतादि सगन्धानां शंकरादिग्रन्थानां भगवदभिप्राय विरुद्धताख्यापनाय उक्तसंग्रहप्रकारेण शिष्याणां यथावस्थित समस्तगीतार्थ प्रपंचावगाहनायच निगमयति ।

इति गीतार्थसंग्रहः ॥ ३२ ॥

इत्थमेव सत्वनिष्टसंप्रदायपरंपरागत स्समीचीनो गीतार्थः । नपुनः कुदृष्टिभिरुन्नीतः । सचैष स्वयोग महिमचुळकित परमपुरुषविभूतियुगळ भगवन्नाथमुनि नियोगानुवार्ति श्रीमद्राममिश्रसकाशा द्बहुशास्त्रविद्भि रस्माभि र्बहुश श्श्रुतस्य भगवद्गीतार्थ प्रपंचस्य संग्रहइति मुमुक्षुभि स्संग्राह्यतम इति भावः ॥ ३२ ॥

सारं फल्गुन सारथीयवचसां श्रीयामुनेयोद्धृतम्
विस्पष्टै रिति वेंकटेश्वरकवि र्व्याचष्ट भाष्याक्षरैः ।
यद्वादेषु कुदृष्टिबाह्यकुहनाकोलाहलास्कन्दिभि
र्जंघाले जयघोषणावणघणै र्विद्राणनिद्रादिशः ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य
वेदांताचार्यस्य कृतिषु श्रीगीतार्थसंग्रहरक्षा ।

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेंकटेशाय वेदान्तगुरवे नमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः ।

ಸೇರ್ಪಡೆ ಸಂಖ್ಯೆ.........R3449

G 35

SRI CHAMARAJENDRA SANSKRIT COLLEGE
LIBRARY

Class ~~M 44~~ Ac. No. 640

Author [illegible]

Title [illegible]

Lent	Returned	Lent	Returned	Lent	Returned
3/7/42	17/7/42				

SRI CHAMARAJENDRA SANSKRIT COLLEGE
LIBRARY

This book was loaned on the last date mentioned below and it is returnable within a fortnight therefrom unless the loan is renewed.

1641-36 B P.